Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ स्वकृतेः प्रामाण्यशंकां निरस्यति पिंगलादीनि। पिंगलः सूत्रकारः आदिना भाष्यकारादयः लौकिकमिति तेन चातुर्वर्ण्यस्याधि
कार इति भावः अन्ये हलायुधवृत्तिकारः छंदस्त्रिविधं गणमात्रावर्णभेदात् तत्राद्यमार्यादि द्वितीयं वैतालीयादि तृतीयं सामान्यादौत्या
द तन्न गणच्छंदसो मात्राछन्दस्येवान्तर्भावादित्याशयेनाह द्विधेति मात्राछन्द आर्यादि वर्णछन्दः श्रीप्रभृति एतेन मात्राछन्दो गणछ
न्द इति द्विधा विभागोऽपि निराकृतः ४ शतमिति ग्रंथगणनायां प्रसिद्धानामनुष्टुप्छंदसां श्लोकानामिति शेषः एतेन सम्भावितोऽ
न्यकर्तृकछन्दोन्तरप्रसंगोऽपि निराकृतः ५ अथ द्वितीयाद्यध्यायगतवक्ष्यमाणलक्षणोपजीव्याः संज्ञा उद्दिशति म्यरस्तेत्यादिना

पिंगलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा मात्रावर्णविभेदेन छंदस्तदिह कथ्यते ४ षडध्यायनिबद्धस्य छंद
सोऽस्य परिस्फुटम् प्रमाणमपि विज्ञेयं षट्त्रिंशदधिकं शतम् ५ म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः सम
स्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ६ सर्वगुर्मो मुखान्तर्लौ यरावन्तगलौ सतौ ॥ ॥ ॥ ॥

म य र स त ज भ न ग ल इति दशैता एकाक्षराः संज्ञाः मीः श्रीः स्त्रीमित्यादिसूत्रानुसारात् अकारोच्चारणं तु क्वचिन्मयरसतजभ
नगलसंमितमित्यादिवत्सुखसुखोच्चारणार्थमिति भावः आसां संज्ञानामीदृशक्रमे बीजं तु षष्ठ्यस्यामः समस्तमिति संस्कृ
तप्राकृताद्यात्मकमित्यर्थः त्रैलोक्यमिति सर्वं विष्णुमयं जगदित्युक्तेः ६ अथैतासां संज्ञानामभिधेयमाह सर्व[illegible] सर्वे त्रया
गवो गुरवो यस्मिन्स मो मसंज्ञः मुखमादिर्लौ लघुर्यस्मिन्सः नौ च ह्रौ[illegible]स्य सः मध्यौ ॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लघुराद्यंतौ गुरू यस्य सरः अन्त्यो गुरुरत्यौ च लघू यस्य सः अन्त्यो लघूराद्यौ गुरू यस्य सतः मध्यो गुरुराद्यन्तौ लघू यस्य जः आद्यो
गुरुरन्त्यौ लघू यस्य स भः त्रिलघुर्नः इत्यष्टौ त्रिकास्त्रयो वर्णाः परिमाणमेषां ते त्रिकास्त्रिवर्णात्मका इति यावत् गणा भवन्ति मऽऽऽ
य।ऽऽ रऽ।ऽ स।।ऽ तऽऽ। ज।ऽ। भऽ।। न।।। यद्यपि सूत्रकृता पादिषु वक्ष्यमाणानां चतुर्मात्राणामेव लः समुद्गणा इति तृतीयाध्यायगतसू
त्रेण गणसंज्ञा कृता धीः श्रीः स्त्रीमित्यादि सूत्रगतं मकारं च संज्ञात्वेन स्वादिवृत्तिग्रंथस्याप्येवमेव स्वारस्यं तथापि मात्रातो वर्णसमुदा
यरूपत्वाद्गणत्वेन व्यवहारः अत एवात्रापि पुङ्नजिति सूत्रेण जगणः नकतेव्य इति वृत्तिकारः अत्र स्मवधेयम् दुष्टा रसतजाः।
यस्माद्धनादीनां विनाशकाः काव्यस्यादौ न दातव्या इति छंदो विदो जगुः। यदा देववशादाद्यो गणो दुष्टफलो भवेत् तदा तद्दो

॥ ग्मध्याद्यौ ज्भौ त्रिलो नोऽष्टौ भवंत्यत्र गणास्त्रिकाः ७

षण्णांत्वर्थशोध्यः स्यात् परो गणः तद्यथा मनौ मित्रे भयौ भृत्यौ उदासीनौ जतौ स्मृतौ रसावरी नीचसंज्ञौ द्वौ द्वावेतौ मनी
षिभिः मित्रोदासीनभृत्येष्वामित्रभृत्यौ शुभौ मतौ अन्येष्विष्टविनेष्टाः इत्यूह्यं परिशेषतः स्मोऽम्बुऽग्न्यऽनिलखाऽर्केन्दुनाका २
माद्रेः सुराः क्रमात् श्रीवृद्धिनाशपथ्यस्त्रीरुक्कीर्त्यायुः फलानि च गणप्रसंगाद्वर्णानामपि शुद्धिः प्रकाश्यते अङ्कः नज्ञा ष्टठ।
णास्यापवाभ मरालवो षहल्लासंयुता श्चान्यकाव्यादौ न शुभा मताः अत एवोक्तम् अक्षरे परिशुद्धे तु नायको भूतिमृच्छति निःसंदे
स्येनस्यापवादो भामहे नोक्तः देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ते सर्वे नैव निंद्याः स्युर्लिपितो गणतोऽपि चेति ॥ ७ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथद्वितीयाऽध्यायगताऽऽर्यालक्षणोपजीव्यानांपंचगणानांस्वरूपमाह ज्ञेयाइतिसर्वेऽत्रान्तश्चमध्यश्चादिश्चसर्वान्तमध्यादयः
तेगुरवोयेषुतेतथोक्ताः द्वंद्वान्तेश्रूयमाणत्वाद्गुरुपदस्यप्रत्येकमन्वयः तेनसर्वगुरुःऽऽ अन्तगुरुः मध्यगुरुः आदिगुरुश्चेतिचत्वारो
गणाः ननुतर्हिमसजभरूपाएवतइतिपुनः कथंनवृथैवैतेषामतः आह चतुष्कलाइति चतुर्मात्राएतेनत्र्यक्षरात्मकामसज
भाः तेनसर्वगुरुर्द्विगुरुरित्यर्थः एकस्यगुरोर्द्विमात्रत्वात् एवमन्त्यगुरावादौलघूमध्यगुरावाद्यन्तयोरादिगुरावन्त्यावेवद्वे
यो अन्यथाचतुर्मात्रतानस्यादेवंचतुरोगणानुक्त्वापञ्चमगणमाह चतुर्लध्विति चत्वारोलघवोयस्मिन्सचतुर्लघुः पञ्च

॥ ज्ञेयाः सर्वान्तमध्यादिगुरवोऽत्रचतुष्कलाः गणाश्चतुर्लघूपेताः पंचाऽऽर्यादिषुसंस्थिताः ८

मोगणस्तेनसहिताः पंचगणाः यथाद्विगुरुः ऽऽ अन्तः ।।ऽ मध्यः ।ऽ। आदिगुरुः ऽ।। चतुर्लघुरिति ।।।। एषामुपयोगआर्या[illegible]लक्ष
णोद्वितीयाऽध्यायेभविष्यति यत्तुसुधीटीकाव्याख्यानंसर्वत्राऽन्तेमध्येआदौचगुरुर्येषांतइतितच्चिन्त्यम् शेषावकु[illegible]रति
पाणिनिसूत्रस्थेनशेषपदेनत्रिकस्तर्हिशेषग्रहणमित्यादिमहाभाष्यवार्तिकादिग्रन्थेनचस[illegible]धात् अतएवत्रि[illegible]मानन्ध्र
चित्राणांगवामयमितिमीमांसकोक्तविग्रहोपिनश्रद्धेयः अत्रसर्वेचतेआदिश्चेत्यादिग्रंथेनकर्मधार[illegible]चेतः सुदृढ़णस्यानुमस्त्रपाद
समासः सर्वगुरुगणस्याऽनुपपत्तेः किंचाऽऽद्यन्तपदयोरन्त्ययोःऽशुद्धोमात्राप्रस्तारक्रमविरोधादितिषष्ठेस्फुटीकरिष्यंतद्विनेः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ गुरुलघुस्वरूपमाह सानुस्वार इति यथा तरुणं सर्षपेत्यादावनुस्वारान्तो णो गुरुः श्रियः पतिरित्यादौ विसर्गान्तो यो युक्तपर
योगपरो यथा तरुणं सर्षपेत्यत्र सकारादिः कारः चकाराद्व्यंजनान्तोपि यथा तन्मुवां मन्मथविभ्रमोऽभवदिति यत्तु भट्टा युक्तपर
जनो पध्मानीयजिह्वामूलीयपराणामुपलक्षणमिति व्याचख्युस्तत्र व्यंजनांशे उपलक्षणत्वमास्तां जिह्वामूलीयांशे तु संयोगः
नैवास्तीति कथं तदिति चिन्त्यम् अयोगवाहानां शषसपसंख्यानत्वाज्जिह्वामूलीयोपध्मानीययोर्ह्रस्वेन कवर्गपवर्गयोरानन्तर्ये
णासंयुक्तत्वात् यथोक्तम् हयवरट् इति सूत्रे महाभाष्ये उरः कः हलोनन्तराः संयोग इति संयोगसंज्ञेति पृथगनुस्वारग्रहणानुगोवली
वर्दन्यायेन एवं विसर्गस्याऽपीति ध्येयम् एवं ह्रस्वस्य गुरुत्वमुक्तं दीर्घश्च गुरुः तरुणं सर्षपशाकमित्यत्रैव शकारात्परः आकारः वा पा

सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः वा पादान्ते त्वसौ ग्वक्रो ज्ञेयोऽन्यो मात्रिको लृजुः ९

दान्त इति पादस्य ह्रस्वो माप्यस्तदन्यलघोर्गुरुत्वं वैकल्पिकं तेन गुरुत्वाज्ज्ञेतो तु वंसस्थमुदीरितं जरौ विति वंसस्थलक्षणम्
जगन्निवासो वसुदेवसद्मनीत्यत्र संगतं भवति अन्यथा सद्मनीति इकारस्य लघुत्वेन रगणान्तत्वं न स्यात् क्वचित्तु लघु नैवेति ३
नजौ समानिका गलौ चेत्यादौ समानिकादिलक्षणासमन्वयः विषमपादान्त्यलघोस्त्वनुस्वारादिपरत्वं विना न गुरुत्वम् अत
एव सप्तमे काव्यप्रकाशकृतोक्तम् विकसितसहकारभारहारि परिमलपुंजितगुंजितद्विरेफ इत्यत्र परिमलपदं त्यक्त्वा पूर्ववर्णः
संयुक्तार्थम् अमुदित इति पाठो युक्त इति कवयस्तु विषमपादान्त्यस्यापि गुरोः स्थाने लघुं प्रयुञ्जते यथा दिवाकराद्रक्षति यो गुहासु॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्यादि अथ गुरोः प्रस्तारलेखनसम्प्रदायमाऽऽह वक्र इति यथाऽन्त्यो गुरोरन्त्यो मान्त्रिको ल लघुर्ज्ञेयः स तु ऋजुर्लेख्यो यथा ९ अथ गुरोरपि क्वचिल्लघुतामाह पादादाविति पादादौ यः संयोगः क्रमसंज्ञकः तस्मिन्परतः पूर्वस्य गुरोरपि वर्णस्य लघुता स्यात् अस्येति लघुत्वस्येत्यर्थः १० तरुणमिति अत्राऽल्पव्ययेन सुन्दरि इति तृतीयपादान्त्य इकारो ग्राम्येति संयोगपरत्वाद्गुरुरित्याऽऽर्याया स्तृतीयपादस्य द्वादशमात्रनाऽनकल्प्यत इत्यत्र तस्य लघुत्वमुच्यते यदुक्तं श्रुतबोधे यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्येति वस्तुतस्तु रत्नाकरादिग्रंथपर्यालोचने आर्यायाः पादव्यवस्था न लभ्यते अत एव पादादाविह

पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः पुरःस्थितेन तेन स्याल्लघुताऽपि क्वचिद्गुरोः १० उदाहरणम् तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि अल्पव्ययेन सुंदरि ग्राम्यजनो मिष्टमश्नाति ११

वर्णस्येति पाठः क्वचित्पुस्तके उपलभ्यते युक्तश्चायं कुत्र विसंयुक्तपरो वर्णो लहु होइ इति प्राकृतपैङ्गले सामान्यतः [illegible]भिधानात् प्राप्तनाभिह्रदमज्जनमाशु प्रस्थितं निवसनग्रहणायेति माघादौ नाभीतीकारस्य ह्रेति संयोगपरस्यापि लघुताया औचित्याच्च अन्यथा स्त्रीगतेति रनभाङ्कस्य युग्मं स्त्र्याऽसंगतेरितिदिक् सरस्वतीकण्ठाभरणकारस्तु पदान्ते तीव्रप्रयत्नेन संयोगादेरगौरवम् न छन्दोभंगमप्याहुः तदादावपास्यस्तु यइत्याह एतेन छन्दोभंगभीत्या पूर्वोक्तमाघश्लोके ह्रदशब्दमपनीय नदशब्दः पठनीय इति दुर्घटवृत्तिकारोक्तम[illegible]त्यः

हा।
१८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृ॰र॰ अब्धीति अब्धयोऽनुष्टुभिस्नातमित्यादौ व्यवहृता नामिनि शेषः चतुर्थांश इति श्लोकस्येति शेषः आर्यादिषु वक्ष्यमाणायां यतेः [illegible]प्रमा
स॰टी॰ हृविच्छेदेति यथा वक्ष्यति षष्ठे द्वितीयलादित्यादिः संज्ञान्तरमाह युक्समिति युगिति समपादस्य संज्ञा यथा वक्ष्यत्यनुष्टुप्प्रकरणे युजो
४ जेन सरिद्भर्तुरित्यादि अयुगिति विषमपादस्य संज्ञा यथा तत्रैव वक्ष्यति चपलावक्त्रम् अयुजोरित्यादि चकारात्समपर्यायो युग्मशब्दः
विषमपर्याय ओजःशब्दश्च ज्ञेयः यथा वक्ष्यति वैतालीयप्रकरणे पदा समावोजयुग्मकावित्यादि समम् इति तृतीयेध्याये वक्ष्यति गु॰

अब्धिभूतरसादीनां ज्ञेयाः संज्ञास्तु लोकतः ज्ञेयः पादश्चतुर्थांशो यतिर्विच्छेदसंज्ञिका १२ युक्समं विषमं चाऽयु
क्स्थानं सद्भिर्निगद्यते समम् अर्द्धसमं वृत्तं विषमं च तथा परम् १३ अंघ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः तच्छ
न्दःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते १४ प्रथमांघ्रिसमो यस्य तृतीयश्चरणो भवेत् द्वितीयस्तुर्यवद्वृत्तं तदर्द्धसम
मुच्यते १५ यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् तदाहुर्विषमं छन्दश्छन्दःशास्त्रविशारदाः १६ आरभ्यैका
क्षरात्पादादेकैकाक्षरवर्द्धितैः॥ श्रीरित्यादिः अर्द्धसमम् इति यथा चतुर्थे वक्ष्यति विषमे यदि सौ सलगा इत्यादि अन्यत्तु तमध्या ४
हृति भद्दोत्कलाख्यानं चिन्त्यम् उपचित्रमत्यागो वौ जाऽभ्यास्तत् विषमं चेति यथा पंचमे वक्ष्यति मुखपादोऽष्टमि रित्यादि एषां त्रयाणां
स्वरूपं श्लोकत्रयेणाऽऽह १३ अंघ्रयो यस्येत्यादिना यस्य चत्वारः पादास्तुल्यास्तत्समं यस्य प्रथमतृतीययोर्द्वितीयचतुर्थयोश्च पाद
योः साम्यं तदर्द्धसमं यस्य चत्वारोऽपि पादा विलक्षणास्तद्विषमम् इत्यर्थः आरभ्येति एकाक्षरम् आरभ्य षड्विंशत्यन्तम् एकाक्षरवर्द्धितैः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समं वृत्तं तृतीयाध्याये पृथग्वक्ष्यन् द्वन्द्वम् तदूर्ध्वमिति षड्विंशत्यूर्ध्वं चण्डवृष्ट्यादीनि अर्णाऽऽदिना व्यालजीमूतादय इति सुधोक्ति स्थिन्या
अर्णोर्णवयोस्त्यागस्य निर्बीजत्वात् शेषमिति ततोऽन्यैः षड्भिश्चरणैरुपलक्षितानां गाथानामकरणं शेषमित्यर्थः १८ एका
क्षरादिषड्विंशत्यऽन्तानां छन्दसां क्रमेण संज्ञाः श्लोकत्रयेणाऽऽह उक्तेत्यादिना द्वितीयेमा आवृत्तमुक्त्वा सर्ववृत्तानां लक्षणं साम्प्र

पृथक्कण्ठे दोषभवेत् पादे यावत्षड्विंशतिं गतम् १७ तदूर्ध्वं चण्डवृष्ट्यादिदण्डकाः परिकीर्तिताः शेषं गाथास्त्रिभिः
षड्भिश्चरणैश्चोपलक्षिताः १८ उक्ताऽत्युक्ता तथा मध्या प्रतिष्ठाऽन्या सुपूर्विका गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरे
व च १९ त्रिष्टुप् च जगती चैव तथाऽतिजगती मता शक्वरी साऽतिपूर्वा स्यादष्ट्यत्यष्टी ततः स्मृते २० धृतिश्चातिधृतिश्चै
व कृतिः प्रकृतिराकृतिः विकृतिः संस्कृतिश्चैव तथाऽतिकृतिरुत्कृतिः २१ इत्युक्ताश्छन्दसां संज्ञाः क्रमशो वच्मि साम्प्र
तम् लक्षणं सर्ववृत्तानां मात्रावृत्तानुपूर्वकम् २२ इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकरे छन्दःसंज्ञाभिधा
नः प्रथमोऽध्यायः १ ॥

तं वृत्तीयांदो वच्मि वक्ष्यामि वर्तमानसामीप्ये वर्तमानवत्प्रत्ययः ॥ इति श्रीमदग्निहोत्रिकुलतिलकायमानश्रीमन्नारायणभट्टसूनु
भास्करविरचिते वृत्तरत्नाकरसेतौ प्रथमोऽध्यायः १ अथ पद्यद्वयेनाऽऽर्यालक्षयति लक्ष्मैतदित्यादिना यत्र चतुर्मात्रागणाः सप्तभव
न्ति एकेन गुरुणाऽष्टमस्थानीयेन सहिताश्चेत् तदाऽऽर्यायाः प्रथमार्धं नियतं लक्ष्म लक्षणं ज्ञेयम् एवं सप्तगणानामष्टाविंशतिमात्राः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

वृ॰र॰ सं॰टी॰ ५

अष्टमस्थानीयगुरोरत्रहृद्ध्मात्रेइतिसंयोजनात्त्रिंशन्मात्रावैशिष्ट्यमाऽऽर्यायाःप्रथमार्द्धेलक्षणम्पर्य्यवसितम् तत्किंविशेषणेनेत्याह।
भवतीति इहप्रथमार्द्धेविषमेविषमस्थानेप्रथमतृतीयपंचमसप्तमास्वेद्विगुर्वादिवन्मध्यगुरुरूपचतुर्मात्रत्वात्मार्य्ये जोजगणोन
भवतिसमेत्वनियमः।ह्यत्रतर्हिनियतः स्यादत आह षष्ठइति षण्णांपूरणःषष्ठोवा अथवाषष्ठोनलघूस्यात् नश्चलघुश्चनलघूनगण
स्त्रिलघुरेकइतरोलघुश्चेति चतुर्लघुरूपोगणः षष्ठादयइतियावत् तथाचजगणचतुर्लघ्वन्यतरएवषष्ठइतिनियमः फलितः
यथाऽत्रैवलक्षणसमन्वयः लक्ष्मेइतिद्विगुरुरूपश्चतुर्मात्रएकोगणः एवंतत्सपइतिद्वितीयः नगणाइत्यन्त्यगुरुस्तृतीयः गो
पेइतिद्विगुरुश्चतुर्थः तएवइत्याऽऽदिगुरुःपंचमः निनेहेतिमध्यगुरुःषष्ठः विषमेइत्यऽन्त्यगुरुः सप्तमइति सप्तगणानामऽष्टावि

लक्ष्मैनत्सप्तगणागोपेताभवतिनेहविषमेजःषष्ठोऽयंनलघूवाप्रथमेऽर्द्धेनियतमार्य्यायाः १

ंशतिमात्राः जइतिचाऽन्त्यगुरुरितितत्स्थहृद्ध्मात्रेइतिसंयोजनात् त्रिंशन्मात्राः सन्तिप्रथमार्द्धेनास्तिविषमस्थानेजगणःषष्ठस्तस्य ५
वतिनेहेति नचव्यंजनत्वाद्द्वमात्रिकमित्युक्तेर्व्यञ्जनद्वयसंयोगस्यमात्रात्मकत्वात् लक्ष्मेइत्यादौमात्राऽऽधिक्यान्नत्रिंशन्मात्रा
रूपंलक्षणाऽसंगतिरितिवाच्यम् अत्रअचमात्राणामेवगणनत्वेनव्यंजनसंयोगानामऽनर्थ्यत्वात् नलघूवेत्यस्योदाहरणा
न्तु द्वितीयपद्यप्रथमार्द्धेज्ञेयम् अत्रषष्ठोयमितिषष्ठस्थानेजगणइतिसुधीतकव्याख्यानमनादेयम् प्रथमायाःषष्ठस्थलक्ष
णापत्तेःपश्चनलघूवेत्यत्रनगणयुक्तोलघुरितिसुहृत्रायाआहतन्ननलघूइतिद्विवचनानुपपत्तेः १ ॥ १ ॥ १ ॥ १

६ ॥ एवमार्यायाः पूर्वार्द्धलक्षणयित्वा द्वितीयेन पद्येन यतिनियममुत्तरार्द्धलक्षणं चाह षष्ठे इति अत्र प्रथमे इत्यनुवर्त्तते षष्ठस्थाने न्लो
नगणयुक्ते लघौ चतुर्लघाविति यावत् कृते सति चतुर्लघुसम्बन्धी यो द्वितीयो लघुस्तस्मात्प्रथमे पूर्वस्मिन्प्रथमलघौ सयतिः सवि
च्छेदः पदस्य नियमस्य समाप्तिः परक इति सप्तमस्थाने न्ले सति मुखलादादिलघोः प्रथमे षष्ठगणान्ते सविच्छेदः पदसमाप्तिरि
त्यर्थः यथात्रैव षष्ठे द्वितीयलात्परके न्ले मुखलाच्च त्यत्र षष्ठे चतुर्लघुप्रयुक्तायतिः सप्तमीत्यत्र तु सप्तमनलघुप्रयुक्ता अथो
त्तरार्द्धे यतिनियममाह चरमे इति अन्तिमेर्द्धे पंचमस्थाने न्ले सति तस्य प्रथमलघोः पूर्वस्मिंश्चतुर्गणान्ते यतिः यथा चरमेर्द्धे पंचम

षष्ठे द्वितीयलात्परके न्ले मुखलाच्च सयतिपदनियमः । चरमेर्द्धे पंचमके तस्मादिह भवति षष्ठो लः २ त्रिष्वं-
शकेषु पादो दलयोराद्येषु दृश्यते यस्याः पथ्येति नाम तस्याः छन्दोविद्भिः समाख्यातम् ३ ॥ केतस्मादित्यस्यान्ते

अथोत्तरार्द्धलक्षणमाह इह भवतीति आर्योत्तरार्द्धे षष्ठगणस्थाने न्ल एको लघुरेव देयो न तु चतुर्मात्रो गणः शेषं पूर्वार्द्धवत् एवं हि
पंचगणानां विंशतिमात्राः षष्ठगणस्थाने यल्लघोरेकाः सप्तमगणस्य च तस्त्रः अष्टमस्थाने यो गुरोर्द्धे इति संयोजनात् सप्तविंशतिमात्रा
वेदितव्यमार्योत्तरार्द्धलक्षणं पर्यवसन्नमस्ति चेदं चरमे इत्याद्युत्तरार्द्धे षष्ठो यमित्यादि पूर्वपद्योत्तरार्द्धे चेति स्वयमवगमनीयम्।
दा आर्यादिवृत्तेषु भूयांसः सन्ति पद्यपितथाप्यनुपयुक्तत्वाल्लघुवैकल्यतानिह २ इत्यार्यालक्षणम् अथ पथ्यार्यालक्षणमाह त्रि
ष्विति यस्या द्वयोरप्यर्द्धयोस्त्रिष्वंशकेषु चतुर्मात्रगणेषु पादो विरामो दृश्यते सा पथ्येति केवलं यतिकृतमार्यायास्त्या वैलक्षण्यं यथा त्रि ॥

घंशकेषु पादो इत्यस्यान्तयतिः पूर्वार्द्धे पथ्येति नाम तस्या इत्यन्वयोत्तरार्द्धे ॥ ३ ॥

वृ.र.
स.टी.
६

अथ विपुलालक्षणमाह उल्लंघ्यगणत्रयमादिमिति गणत्रयमुल्लंघ्य दीत्यत्र विरामः एवमुत्तरार्द्धेप्यवसेयं विपुलाइति प्रसिद्धा ४ अथ
चपलालक्षणमाह उभयेति गुरुमध्यगतो जगणो यस्याद्वयोरप्यर्द्धयोर्द्वितीयचतुर्थौ स्यातां सा चपला आर्य्या यथा पूर्वार्द्धे द्वयोर्जइति
द्वितीयो जगणः द्वितीयइति चतुर्थोऽपि एवमुत्तरार्द्धे तिनामेति द्वितीयो जगणः प्रकीर्तितं इति चतुर्थश्च ५ अथ मुखचपलालक्षण
माह आद्यमिति यस्या आद्यमर्द्धं चपलालक्षणविशिष्टं या शेषे पूर्वजलक्ष्मा आर्य्योत्तरार्द्धं सामान्यलक्षणेन सप्तविंशति मा

उल्लंघ्यगणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः यस्यास्तां पिङ्गलनागो विपुलामिति समाख्याति ४ उभया
र्द्धयोर्जकारौ द्वितीयतुर्यौ गमध्यगौ यस्याः चपलेति नाम तस्याः प्रकीर्तितं नागराजेन ५ आद्यन्दलं समस्तल्लाम्भ
जेत लक्ष्म चपलागतं यस्याः शेषे पूर्वजलक्ष्मा मुखचपला सोदिता मुनिना ६ प्राक्प्रतिपादितमर्द्धे प्रथमे
प्रथमेतरे तु चपलायाः लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला ७ आर्याप्रथमदलोक्तं यदि कथमपि
लक्षणं भवेदुभयोः ॥

त्रारूपेण विशिष्टा सा मुखचपला अन्वर्था चेयं संज्ञा मुखे पूर्वार्द्धे चपलालक्षणवत्त्वात् ६ एवमुत्तरार्द्धे
चपलालक्षणवत्त्वाज्जघनचपलायामपि अत एवाह प्रागिति प्रथमेर्द्धे आर्य्यासर्वार्द्धे लक्षणम् प्रथमेतरे द्वितीये चपलालक्षणं सा
जघनचपला प्रथममितरद्यस्मादिति बहुव्रीहिः इत्यार्य्याप्रकरणम् ७ अथ गीतिः आर्य्याप्रथमेति यस्याः पूर्वार्द्धवद्द्वितीयार्द्धेपि लक्ष्मे
तदित्यादि पूर्वार्द्धलक्षणं भवेत्तां पिङ्गलो गीतिं मुक्तवान् कथमपीति पूर्वोक्तषष्ठायं नलघू वेति पक्षयोरन्यतरपक्षेणाऽपीत्यर्थः य ६

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गणाचतुर्लघुगणान्यतमप्रकारेणेतिव्याख्यातन्तदसुद्धंषष्ठजगणचतुर्लघुरूपयोर्द्वयोरेवैकस्यनिर्द्धारणे यत्नात् अन्यतमशब्दोद्विबहुविषयकनिर्द्धारणेप्रयुज्यते यदुक्तं पश्यशायिवै येटेनाऽन्यतरान्यतमशब्दावुत्पन्नौस्वभावाद्द्विबहुविषयेनिर्द्धारणेवर्त्तेते इति ८ अथोपगीतिः आर्य्याद्वितीयेति इहभवतिषष्ठोलइत्यार्य्योत्तरार्द्धलक्षणंयस्याद्वयोरप्यर्द्धयोस्स्यात्सोपगीतिः ९ अथोद्गीतिः आर्य्याशकलमिति यस्याद्वितीयमर्द्धं पूर्वार्द्धलक्षणकम्पूर्वार्द्धन्तदुत्तरार्द्धलक्षणकमितिव्यत्ययेनाऽर्द्धरचितंसोद्गीतिनद्द्वि(?)तिपथ्यार्य्यावदितिभावः यत्यंशेति त्रिषंशकेषित्याद्युक्तसंयुक्तेत्यर्थः १० आर्य्यार्य्यागीतिः आर्य्यापूर्वार्द्धमितित्रिंशन्मात्रारूपंपूर्वार्द्धनिधनेऽन्ते

दलयोःकृतयतिशोभान्ताद्गीतिर्गीतवान्भुजङ्गेशः ८ आर्य्याद्वितीयकेर्द्धे यद्गदितंलक्षणन्तत्स्यात् यद्युभयो
रपिदलयोरुपगीतिंतां मुनिर्ब्रूते ९ आर्य्याशकलद्वितयंव्यत्ययरचितम्भवेद्यस्याः सोद्गीतिः किलकथिता
तद्वद्यत्यंशभेदसंयुक्ता १० आर्य्यापूर्वार्द्धंपरिगुरुणैकेनाऽधिकेननिधनेयुक्तम् इतरत्तद्वन्निखिलम्भवति
यदीयमुदितयमार्य्यागीतिः ११॥

एकेनगुरुणायुक्तं द्वात्रिंशन्मात्राविशिष्टंपूर्वार्द्धमितियावद्यदीयंस्यात् उत्तरार्द्धमपिनिखिलन्तद्वद्द्वात्रिंशन्मात्राविशिष्टमित्यर्थः सार्य्यागीतिः तथाचोक्तंसूत्रकारेणाऽन्त्येऽर्द्धेवसुगणआर्य्यागीतिः अत्रसूत्रेऽर्द्धे इतिवसुगणे इतिचप्रथमाद्विवचनान्तमितिसुधालाबुकम् तन्नऽर्द्धेद्दे इतिद्विवचनमितिप्रगृह्यत्वात्प्रकृतिभावापत्त्यासादेशाद्यऽनापत्तेतस्मादेतत्सूत्रमित्थम्वृत्तिकृताव्याख्यातमाद्येर्द्धेद्वितीयेचाष्टगणास्स्यात्यार्य्यागीतिः एतेनपूर्वार्द्धेद्वात्रिंशन्मात्रा उत्तरार्द्धेत्वेकोनत्रिंशन्मात्राऽप्यार्य्यागीतौभवन्तिइतिमन्यमानाः सुधिनणाद्यापिनिराकृताः मधुकरविटपानमिता तरुणीर्विश्वतीःऽस्यविटपानमिताः परिपाक

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ वैतालीयम् षड्विषमइति वैतालीये छन्दसि विषमे पादे प्रथमतृतीययोः षट्कलाः षण्मात्रा देयास्तासामन्ते च रलौ रश्च लश्च रलौ
मध्यलघुरगणः अन्त्यो लघुश्च ततो गुरुश्चेति समे पादे द्वितीयचतुर्थरूपे अष्टौ कला देयाः ताश्च निरन्तरा नो स्युः नो इति निषेधार्थः अव्य
वहिता लघवो न देया इत्यर्थः तासामष्टकलानामन्ते विषमपादवत् रगणो लघुगुरू च देयौ अत्राद्यासु षडष्टकलासु मध्ये समा कला द्विती
यादिका पराश्रिता तृतीयाद्याश्रिता न कर्तव्या द्वितीयातृतीयाभ्यामेको गुरुर्न कर्तव्य इत्यर्थः एवं चतुर्थीपंचमीभ्यां षष्ठीसप्तमीभ्यां
च तदिदं वैतालीयं लक्षणमस्ति चेदमेवं षड्विषम इति प्रथमं विषमपादे षण्मात्रास्तासामन्ते ष्टौ समे इति रगणस्तदन्ते च कला इ
ति लघुगुरू नास्ति च द्वितीयातृतीयाभ्यां चतुर्थीपंचमीभ्यां च मात्राभ्यां मे गुरुः किन्तु द्वि प्रथमाद्वितीयाभ्यां पंचमीषष्ठीभ्यामस्ति

षड्विषमेष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः न समात्र पराश्रिता कला वैतालीयेन्ते रलौ गुरुः १ पर्य
न्ते र्यौ तथैव शेषमौपच्छन्दसिकं सुधीभिरुक्तम् २ आपातलिका कथितेयं भाद्गुरुकावथ पूर्ववदन्यत् ३

एवं तृतीयपादे पि द्रष्टव्यम् अथ द्वितीये समपादे ताश्च समे स्युरित्यष्टौ मात्रास्सन्ति तदन्ते नो निरमिति रगणस्तदन्ते तथा इति लघुगु
रू मात्राश्च स्युश्चाऽष्टौ लघवो न सन्ति किन्तु गुरुमिश्रिताः नापि द्वितीयादिमात्रा तृतीयाद्याश्रिताऽस्ति एवं चतुर्थपादेपि द्रष्टव्यम् अथौप
च्छन्दसिकम् १ पर्यन्ते र्यौ इति अवसाने विषमपादे षण्मात्रास्तदन्ते रगणयगणौ समपादे ष्टौ मात्रास्तदन्ते रगणयगणौ यत्र तदौ
पच्छन्दसिकम् तथैव शेषमिति यद्यपि विषमपादान्त्यलघोर्न गुरुत्वमिति प्रयुक्तं तथापि कविसमयप्रसिद्ध्या रसादिकाव्यवि
षयं तत्त्वेनाहत्य विषयमिति भावः २ अथापातलिकेति विषमे षण्मात्रास्ततः समे ष्टावित्यादि पूर्ववत् इयांस्तु विशेषस्तासामन्ते भगणो द्वौ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथदक्षिणान्तिका तृतीययतिः यस्यैवैतालीयस्य चतुर्ष्वपि पादेषु द्वितीयो लघुस्तृतीयेन लघुना युक्तः स्यात् प्रथमो लघुर्द्वितीयो गुरु
रेव स्यादित्यर्थः सा दक्षिणान्तिका ४ अथोदीच्यवृत्तिः उदीच्येति यत्रायुग्मयोरेव पादयोरेनेन तृतीयेन युतः स द्वितीयो लघुः स्या
द्वैतालीयमुदीच्यवृत्तिसंज्ञं ज्ञेयम् ५ अथ प्राच्यवृत्तिः पूर्वेणेति चतुर्थेन युक्तः पंचमश्चेल्लघुस्समपादयोः स्यात्तद्वैतालीयं प्राच्य
वृत्तिः ६ अथ प्रवृत्तकम् यदा समाविति पूर्वयोरुदीच्यवृत्तिप्राच्यवृत्त्योः समौ सदृशौ ओजयुग्मकौ विषमसमपादौ विषमपाद
उदीच्यवृत्तेः समपादः प्राच्यवृत्तेरिति यथासंख्येनाऽन्वयः क्रमस्त्वेकदेशसामान्यादिति नानार्थीयन्यायादिति भावः तत्प्रवृत्तकं नाम अ

तृतीयमयुग्दक्षिणांतिका समस्तपादेषु द्वितीयलः ४ उदीच्यवृत्तिर्द्वितीयलः संयुक्तोऽन्येन भवेदयुग्मयोः ५ पूर्वेण
युतोऽथ पंचमः प्राच्यवृत्तिरुदितेति युग्मयोः ६ यदा समावोजयुग्मकौ पूर्वयोर्भवति तत्प्रवृत्तकम् ७ अस्यायु
ग्मरचितापरांतिका ८ अयुग्मपूर्वकचारुहासिनी ९ इति वैतालीयप्रकरणम् वक्त्रं नाद्यान्नसौ स्यातामब्धेर्यो
नुष्टुभि ख्यातम् ॥ यापरांतिका ७ अस्येति प्रवृत्तकस्य समपादैः प्राच्यवृत्तिलक्षणैर्या सर्वपादैरचिता सापरान्तिका ८ अ
थ चारुहासिनी अयुग्मेति या प्रवृत्तकस्य विषमपादैरुदीच्यवृत्तिलक्षणै रचिता सा चारुहासिनी ९ अथानुष्टुप्प्रकरणम् व
क्त्रमिति अनुष्टुभि अष्टाक्षरे छन्दसि आद्यक्षरादनन्तरं नगणो न स्यात् नो अपि सगणः किन्तु मगणादयो देयाः किञ्च अब्धेश्चतुर्थादक्षराद
ग्रे यो यगणो देयस्तदग्रे चान्य एको वर्णो देयः ईदृशमनुष्टुप्छन्दसि वक्त्रमित्युच्यते यथाऽव्ववइत्याद्यादक्षरादग्रे वक्त्रं नाद्या इ
ति सर्वगुरुर्मगणोऽस्ति न तु नगणसगणौ अब्धेरिति चतुर्थादक्षरादग्रे न सो स्यात् स्यात्तु यगणः एवं च द्वितीयपादेऽपि द्रष्टव्यम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृ॰ र॰
स॰ टी॰
८

अथवक्त्रस्यभेदानाहयुजोरितियुगितिसमपादस्यसंज्ञेत्युक्तमाद्यः द्वयोर्युजोः समपादयोरितिवारिधेश्चतुर्थादक्षराद्ग्रे जेनजगणप्रयोगे
णविषमपादयोर्यगणेनचपथ्यावक्त्रंप्रकीर्तितम् अवशिष्टम्वक्त्रवत् एवमग्रेपि ओजयोरितिविषमपादयोर्वारिधेश्चतुर्थाद
क्षराद्ग्रे जेनजगणप्रयोगेण समपादयोर्यगणेनचविपरीतपथ्यावक्त्रंनामचपलेति विषमपादयोश्चतुर्थाद्ग्रेनगणप्रयो
गेनसमपादयोर्यगणेनचपलावक्त्रंनाम॥ अथयुग्मविपुलायस्यामिति॥ समपादयोर्यस्यांसप्तमोलघुस्स्याच्छेषम्वक्त्रवत्
सायुग्मविपुलानामपद्यपादयोर्युजोरित्यादिपथ्यावक्त्रेप्यस्तितथापुनःपृथक्संकरत्वाददोषः एवंपिङ्गलमतेनविपुलोक्ता अथसै
तवमुनिमतेनाह सैतवस्येति चतुर्ष्वपिपादेषुसप्तमोलघुः साविपुलेतिसैतवस्यमतमित्यर्थः येतुचतुर्थाज्जगणेनैवसैतवविपुलामा

युजोर्जेनसरिद्भर्तुः पथ्यावक्त्रंप्रकीर्तितं ओजयोर्जेनवारिधेस्तदेवविपरीतादि चपलावक्त्रमयुजोर्नकार
श्चेत्पयोराशेः यस्याल्लस्सप्तमोयुग्मे सायुग्मविपुलामता सैतवस्याखिलेष्वपिभेनाब्धितोभाद्विपुला॥ ॥

हुस्तेषांत्वियमेकिम्मानमितिनविघ्नः तस्मात्सायुग्मविपुलामतेत्यत्रैवतज्जभनान्यतमेनगणेनचतुर्षुपादेषुसप्तमेलघौसतिसै
तवविपुलेतिनिर्णयः यथामामकंलक्षणंस्यात्सप्तमोयत्रलघुश्चतुर्षुचरणेषु साविपुलोक्तासुमतिभिः सैतवस्यमतेनतुइति
अथविपुलाभेदानाह भेनेतिचतुर्ष्वरणेषुचतुर्थाद्भगणप्रयोगेणभविपुलास्यात् अतएवैकेनैवचरणेनेयंलक्षिता यत्तुसूत्र
णेनोक्तम्विषमपादयोर्भगणप्रयोगेणभविपुलेति तन्नभ्रान्तोचेतिसामान्यतश्चतुर्थाद्भगणेनभविपुलायाः सूत्रकारेणलक्षितत्वाद्वि
षमपादयोरित्यत्रमानाऽभावात् यदपिभ्रान्तोचेत्यत्रचपलावक्त्रमयुजोरितिसूत्रादयुग्ग्रहणमनुवर्ततइतितन्नतिकारेणोक्तं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

८ सूत्रात्सन्निहितस्यसर्वैपदस्यैवानुवृत्तेर्युक्तत्वात्नविपुलापुग्लः सप्तमइतिसूत्रेयुग्मग्रहणेनव्यवहितपदानुवृत्तिर्नास्तीतिसूत्रकृ
ताज्ञापितत्वाच्च एतेनचपलावक्त्रमित्याद्यनुवर्तनेइतियत्सुहृद्गणोनोक्तंतदपास्तम् यदपितेनोदाहृतंविशालाक्षीकामगजकुम्भव
द्विपुलस्तनीत्यादि तदपिनतस्यैतेनवोक्तविपुलालक्षणाक्रान्ततयाभविपुलालक्ष्यत्वाभावात् एवंद्विवटवटवेश्रवणस्त्वरेचलरे।
शिवङ्क्त्यादिमहाकविप्रयोगोऽपिनाश्लोकस्प्रतिकूलः एवंचनतविपुलास्वपिज्ञेयम् इत्थमितिचतुष्वंरणेषुचतुर्थादक्षरादूगणा।
योगश्चेन्तदाऽन्याविपुलास्यादित्यर्थः नोम्बुधेरितिचतुष्वेचतुर्थान्नगणश्चेन्तदानविपुलानामतोब्धेरितिचतुष्वेचतुर्थान्नगणप्र

इत्थमन्यास्त्वतुर्थात् नोम्बुधेश्चेन्नविपुलातोब्धेस्तन्पूर्वोन्याभवेत् इत्यनुष्टुप्प्रकरणम् द्विगुणितवसुलघुर
चलधृतिरितिच १ मात्रासमकंनवमोल्गान्तम् २ जोन्लावथाम्बुधेर्विश्लोकः ३॥ योगश्चेत्तविपुलानामन्यत्रान्यायदृणा

न्मयसमगणौर्विपुलान्नयमनुक्तमपिज्ञेयमिति प्राच्यः सूत्रादावनुक्तत्वादप्रमाणमितितव्याः अयन्तेषामाशयः विशेषलक्षणेपरा
क्रान्तंलक्ष्यंतस्यतेनतेननाम्नाव्यवहारः पत्तनाक्रान्तन्तस्यानुष्टुविति सामान्यजातिनाम्नाव्यवहारइतिनलक्ष्यविरोधइतिइत्य
नुष्टुप्प्रकरणं अथान्यानिमात्राछंदांस्याह द्विगुणितेति वसवोष्टौद्विगुणितवसवःषोडशेत्यर्थः तत्संख्याकालघवोमात्रायस्यां
साचलधृतिनामप्रत्येकंषोडशलघुपरिमितास्चत्वारः पादाऽस्याभवन्ति एवमग्रेपिपिङ्गलस्त्विमाङ्गीत्याद्यैत्याचष्टे १ अथ्यास्याभेदाना
हमात्रेतियत्रषोडशमात्रेछन्दसिनवमीमात्रालघुरेवअन्तिमोवर्णोगुरुरेवस्याच्छेषंत्वनियमस्तन्मात्रासमकंनाम २ जोन्लाविति अ
म्बुधेश्चतुर्थमात्रातोजगणश्चेच्छेषंप्राग्वत्तदावि
श्लोकइतिनामछंदः॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृ.र. अस्तिचेद्हास्वथावुइतिजगणाः अथअथवाचतुर्मात्रान्तोन्लोनगणोलघुश्चयस्यसानस्यापिविश्लोकइतिनामअस्मिन्पक्षेलक्षणर
सटी. चनातेवंजोन्लावथजलधेर्विश्लोकइति२ नद्युगलेति अम्बुधेर्युगलात्९ष्टमात्रातइत्यर्थः चेज्जगणोनगणोलघूवासावानवासिका
८ नामअस्तिचेद्नवासीनिजगणाः न्लपक्षेतुवानवासिकाजलधियुगात्यादिनिलक्षणरचनावाणेतिपंचाष्टनवसुपदिलघुस्यात्सा
चित्रानामशेषमाभवत् ५ उपचित्रेति नवमस्यानेगुरौसतिउपचित्रानामाइमामेवान्यमतेनाह अष्टाभ्यइति अष्टमात्रनोगुरुर्लघुय
गणप्रयोगादुपचित्रेत्यर्थः ७ अथपादाकुलकमाह यदतीतेति उक्तैर्विविधलक्षणैर्मात्रासमकादिलक्षणैर्युता येमात्रासमका
दिपादास्तैः कलितंयुक्तंपादचतुष्टयंयस्यः नियतवृत्तानामनेकवृत्तानाम्मात्रासमकविश्लोकवानवासिकाचित्रोपचित्रोपचित्राणांप

नद्युगलाद्वानवासिकास्यात् ४ वाणाष्टनवसुपदिलश्चित्रा ५ उपचित्रानवमेपरयुक्ते ६ अष्टाभ्योगल्यादुपचित्रा
७५ यदतीतकृतविविधलक्ष्मयुतैर्मात्रासमादिपादैः कलितम् अनियतवृत्तपरिमाणयुक्तंप्रथितंजगत्सुपादाकु
लकम् ८ वृत्तस्यलाविनावर्णैर्गावर्णागुरुभिस्तथा ॥ रिमाणेनयुक्तम्पादैराकुलितत्वात्पादाकुलकंनामजगत्सुप्रथितमि
त्यर्थः ॥ यथाप्रथमेपादेऽत्रेवमात्रासमकविश्लोकः चित्राणांलक्ष्मणांद्वितीयेविश्लोकोपचित्रयोस्तृतीयेमात्रासमकवानवासिकयोश्च
तुर्थेविश्लोकोपचित्रयोरिति अथसर्वत्रलघुगुरुप्रमाणमाह ८ वृत्तस्येति वृत्तस्यलामात्रावर्णैर्विनावृत्तवर्णसंख्ययान्यूनायासंख्यात
त्परिमितागागुरुसंख्यातेयायथात्रैवप्रथमपादेवृत्तस्यलाविनावर्णैरितिचतुर्दशरूपमात्रासंख्यापादवर्णसंख्ययाष्टरूपयान्यूनोक्र
नाषट्रूपाभवंतितत्परिमितागुरवस्मान्निषड्गुरवइतियावत् एवंसर्वत्रप ह्यगद्येचज्ञेयन्तथागुरु ॥ ॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भिर्विना गुरुसंख्यायाऽवशिष्टा वर्णाः लघुसंख्या ज्ञेयाः यथा चैवाष्टाक्षरे पादे षड्गुरव इति ज्ञाने तदन्यौ द्वौ लघू इति परिशेषाद्बुध्यते अ
थ वा लघुषु ज्ञातेषु परिशेषाद्गुरवो ज्ञेयाः स्यादगुरवो लैरिति लघुभिर्विना लघुसंख्यायाऽविशिष्टाया मात्रासंख्याया दलेऽर्द्धे या संख्या त
त्संख्याका गुरवो ज्ञेया इति गुरुलघुप्रमाणनिश्चितः यथा चैव चतुर्दशमात्रासु द्वौ लघू इति ज्ञाने द्वित्वसंख्यातो विशिष्टाया द्वादशसंख्या
या अर्द्धे संख्या षट् तत्संख्यामिता गुरव इति ॥ शिखेति शिखिभिस्त्रिभिर्गुणिता दश त्रिंशद्भवंति तत्संख्यैर्लघुभी रचितमपगतलघुद्वयं यस्मिं
न् तदष्टाविंशतिलघुयुक्त[illegible]मित्यर्थः एवं पूर्वार्द्धे लघुसंख्योक्ता अथ द्वितीयार्द्धे तामाह अपरमिति उत्तरार्द्धं त्वखिलं त्रिंशल्लघुयुक्तं

गुरवो लैर्दले नित्यमप्रमाणमिति निश्चितं ॥ इति मात्रासमकप्रकरणम् ॥ शिखिगुणितदशलघुरचितमपगतलघुयु
गलमथ परमिदमखिलम् सगुरु शकलयुगलकमपि सुपरिघटितललितपदविततिर्भवति शिखा ॥ १ ॥ वि
नियमविनिहितशकलयुगलकलितपदविततिविरचितगुणनिचया श्रुतिसुखकृदियमपि भवति जग-
ति जितशिर उपगतवतिमति खंजा ॥ ननु पूर्वार्द्धवदष्टाविंशतिलघुकम् अथोभयोरप्यर्द्धयोर्गुरवन्त्य नामाह सगुरु इति अ
र्द्धद्वयमप्यन्ते गुरुसहितं ज्ञेयं सुपरिघटितानां ललितपदानां विततिः रचना यत्र यथा तथा सा शिखा नाम अयं फलितोऽर्थः ॥ पूर्वार्द्धेऽष्टा
विंशतिलघवोऽन्ते गुरुश्च उत्तरार्द्धे त्रिंशल्लघवोऽन्ते गुरुश्च यस्याः सा शिखेति ॥ इयमेव पूर्वार्द्धोत्तरार्द्धयोर्वैपरीत्येन खंजा भवतीत्याह १
विनियमेति विपरीतार्द्धद्वयेन युक्ता पदरचनया विरचिता गुणनिचया यस्य ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृ॰र॰ टी॰ १० त्र इयमपि श्रुत्योः सुखकारिणी जिनकारे खजेत्यत्र जकारस्य शिरः प्र[illegible]पगतवति प्राप्नवति सति या खंजा सा खंजेति भवति लक्ष्या
नुरोधात् एवमुक्तं खंजेत्युच्यमाने छंदोभंगः स्यात् तथोक्तं माधवेहि[illegible]प्रयपूर्वे कापि पुंसि च सत इति २ अष्टाविति द्वाभ्यस्ताद्विगुणिताऽ।
ष्टौ षोडश भवंति नित्यरिमिता यस्याः पूर्वार्द्धे गुरव उत्तरार्द्धे लघवस्त्रिंशल्लघुयुक्तं सानंगक्रीडा नाम चत्वारोऽस्य ऽष्टगुणिता द्वात्रिंशद्भ।
वन्ति ३ त्रिगुणेति त्रिगुणितानव सप्तविंशतिः नेलघवो यस्यामऽवसिताव ऽवसाने गुरुस्यते र्भावेतिन् ईदृशाऽर्द्धद्वयपक्ता तानुयस्याः
साऽतिरुचिरा नाम ॥ इति श्रीमदग्निहोत्रिकुलतिलकायमानश्रीमत्पायाजिभट्टसुतभास्करविरचिते वृत्तरत्नाकरसेतौ द्वितीयोऽध्या।

अष्टावर्द्धे गा द्व्यऽभ्यस्ता यस्याः साऽनंगक्रीडोक्ता दलमपरमपि वसुगुणितसलिलनिधिलघुकविरचितम् ।
दविततिभवति ३ त्रिगुणनवलघुरवसितिगुरुरिति दलयुगकृततनुरतिरुचिरा ॥ इति श्रीभट्टकेदारविरचि
ते वृत्तरत्नाकरे द्वितीयोऽध्यायः २ उक्तायां गुः श्रीः । अत्युक्तायां गोस्त्री ॥ पः २ द्वितीये मात्राछन्दोभिधाय वर्णवृत्तानि वि
वक्षुस्तृतीये समवृत्तानि लक्ष्यन्नेकाक्षरजातिमभिकुरुते उक्तायामिति एकाक्षरपादे छन्दसीत्यर्थः गुः श्रीरिति यस्या एकगुरुरूपः वृ॰ १०
पादः सा श्रीर्नाम यथा श्रीः गुः पायात् यद्यपि समवृत्ताऽधिकारे गोस्त्रीत्यादिवत् पादेनैव श्रीछन्दो लक्षयितुमुचितम् तथापि गुः।
श्रीरिति स्वपार्थमर्द्धापादानम् यत्तु सुधाते लक्ष्यलक्षणयोरेकाक्षरेण पादेनाऽसंग्रहादर्द्धमुक्तमिति व्याख्यातम् तन्न गश्रीरित्येका
क्षरेण पादेनापि तयोः संगृहीतुं शक्यत्वात् अत्युक्तायां द्व्यक्षरे पादे गाविति यस्याः पादे द्वौ गुरू सा स्त्री नाम यथा श्रीमान्मानुः नित्यसेम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मध्यायां त्र्यक्षरे पादे म इति यस्याः पादे मगणः सा नारी नाम नारीणां कल्याणी मां पायात्सा वाणी एवमुत्तरत्रापि स्वयमुदाहरणीयम् र इ
ति यत्र रगणः स्यात् सा मृगी नाम प्रतिष्ठायां चतुरक्षरे पादे म्गाविति यत्र मगण एको गुरुश्च सा कन्या नाम सुप्रतिष्ठायां पंचाक्षरे पादे भ्गाविति
यत्र भगणस्ततो द्वौ गुरू सा पंक्तिर्नाम गायत्र्यां षडक्षरे पादे त्यावाविति यत्र तगण यगणौ सा तनुमध्या नाम शशीति यत्र नगण यगणौ
सा शशिवदना नाम त्साविति यत्र तगण सगणौ सा वसुमती नाम विद्युदिति यत्र द्वौ मगणौ सा विद्युल्लेखा नाम उष्णिहि सप्ताक्षरे पा
दे म्साविति यत्र मगण सगणावेको गुरुश्च सा मदलेखा नाम कुमारेति जगण सगण गुरुभिः कुमारललिता नाम सरौगैरिति सगण रगण

मध्याया म्गो नारी रो मृगी प्रतिष्ठायां म्गौ चेत्कन्या सुप्रतिष्ठायां भ्गौ गिति पंक्तिः गायत्र्यां त्यौ तनुमध्या शशिव
दना न्यौ त्सौ चेद्वसुमती विद्युल्लेखा मो मः उष्णिहि म्सौ गः स्यान्मदलेखा कुमारललिता ज्सौ ग् सरौगैर्हं
समालानुष्टुभि भ्गौ गिति चित्रपदा गः मो मो गो गो विद्युन्माला माणवकं भात्तलगाः म्नौ गौ हंसरुतमेतत् जौ
समानिका गलौ च प्रमाणिका जरौ लगौ ॥

रुभिर्हंसमाला नाम अनुष्टुभि अष्टाक्षरे पादे भ्गाविति भगणद्वयेन गुरुद्वयेन
चित्रपदा नाम म इति मगणद्वयेन गुरुद्वयेन च विद्युन्माला नाम [illegible]णवकमिति ॥ भगण तगण लघु गुरुभिर्माणवकं न्
म्नाविति मगण नगण गुरुद्वयेन हंसरुतं नाम जौ इति रगण जगण गुरु ल[illegible]समानिका नाम अत्र विषमपादान्त्यवर्णस्य गुरुत्वं
कविसमयप्रसिद्धिना वतरति प्रमाणिकेति जगण रगण लघुगु[illegible]णिका नाम ॥०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृ॰र॰ टी॰ ११ विताननमिति समानिकाप्रमाणिकाभ्यामन्यद्वितानं नाम अत्र जगणतगणौ गुरु… तच्चासीन्निताभ्यामिन्नमन्यपदेनाऽत्र लक्षितं छन्दोऽस्या
त्क्रमः अनुष्टुप्त्वमित्यनेकविधमूह्यम् यत्तु मुद्ध्रणेन ज्योत्स्नावितानमेतत् वपरुषप्रिये मनोरममित्यादि यद्यत्र यमुदाहृतं तदसंगत
नाराचकं तरौ लगा वितितस्यलक्षितत्वात् यदपि केचिदन्यदन्तो हि वितानमिति लक्ष्यलक्षणसंयुतं लक्षणमाहुस्तदप्यसंगतम्
अपदालक्ष्यत्वात् यदपि भट्टाः वयन्तु मूढत्वमेनम् एनेषां वितानं तेति ग्रंथेनैको गुरुर्द्वौ लघू पुनर्गुरुरित्यमेव पुनस्तिक्रमविशिष्टस्या
नुष्टुप्छन्दसो वितानत्वं वदन्ता मुक्तिमुररीचक्रुस्तदपि न तस्यमाणवकलक्ष्यत्वात् आभ्यामन्यदित्यस्यातलक्षणानियमाऽभावाद

वितानमाऽऽभ्यां यदऽन्यत् नाराचकं तरौ लगौ वृहत्यां रान्नसावि हहलमुखी भुजगशिशुभृता नौ मः पंक्तौ म्सौ
ज्गौ शुद्धविराडिदम्मतम् म्नौ ज्गौ चेति पणवनामकम् ज्रौ रगौ मयूरसारिणी स्यात् भ्मौ सगयुक्तौ रुक्मवती या
मा।

सगणनया स्वयमपि व्याख्यातत्वेन पूर्वग्रंथविरोधाच्च नाराचेति तगणरगणलघुगुरुभिर्नाराचकं नाम वृहत्यां नवाक्षरे पादे रादिति र
गणनगणसगणैर्हलमुखी नाम त्रिभिः षड्भिश्च यतिरिति भुजगेति नगणद्वयेन मगणेन च भुजगशिशुभृता नाम सप्तभिर्द्वाभ्यां चात्र य ए॰
पंक्तौ दशाक्षरे पादे म्साविति मगणसगणजगणगुरुभिः शुद्धविराडिति नाम म्नाविति मगणनगणजगणगुरुभिः पणवं नामेति १०
प्रांचः वस्तुतस्तु जगणस्थाने यगण उचितः तथा च सूत्रं पणवो म्नौ यगाविति अत एव हि स्थलेपि क्वचिदेवं पाठः म्नौ ज्गौ चेति पणवना
मेदमिति ज्राविति रगणजगणरगणगुरुभिर्मयूरसारिणी नाम भ्माविति भगणमगणसगणगुरुभी रुक्मवती नाम ॥ ॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मतेति मगणो भगणो सगणगुरुभिर्मत्ता नाम नरेति नगणो रगणो जगणो गुरुभिर्मनोरमा नाम स्यादिति तगणेन जगणद्वयेन गुरुणा चो।
पस्थिता नाम त्रिष्टुभि एकादशाक्षरे पादे स्यादिति तगणद्वयेन जगणेन गुरुद्वयेन चेन्द्रवज्रा नाम उपेन्द्रेति जगणतगणजगणैर्गु
रुद्वयेन चोपेन्द्रवज्रा नाम अनन्तरेति इन्द्रवज्रोपेन्द्रवज्रालक्षणसहितपादैर्युक्ता उपजातयो नाम एवमप्रकारेणाऽन्यास्विन्द्रवंशा
दिमिश्रितासु जातिष्विदमेवोपजातिरिति नाम स्मरेति प्रयोगवशात् तत्र वंशस्थोपेन्द्रवज्रामिश्रिता यथा वाल्मीकिरामायणे सु
न्दरकांडे नमोस्तु वाचस्पतये सुवज्रिणे स्वयम्भुवे चापि हुताशनाय अनेन चोक्तं यदिदं ममाग्रतो वनौकसां तच्च तथास्तु नान्यथा इ

मत्ता ज्ञेया मभसगयुक्ता नरजगैर्भवेन्मनोरमा त्जौ जो गुरुणेयमुपस्थिता त्रिष्टुभि स्यादिन्द्रवज्रा यदि तौ ज
गौ गः उपेन्द्रवज्रा जतजास्ततो गौ अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः इत्थं किला
ऽन्यास्वपि मिश्रितासु स्मरन्ति जातिष्विदमेव नाम ॥

न्द्रवंशोपेन्द्रवज्रावंशस्थमिश्रिता यथा ॥ श्रीभागवते दशमस्कंधे ता
वत्प्रतिष्ठास्वसुरोदरान्तरे परेन गीर्णाः शिशवः सवत्साः प्रतीक्षमाणेन बकारिवेशनं हतस्वकान्तस्मरणेन रक्षसा इन्द्रवज्रेन्द्रवंशो
पेन्द्रवज्रावंशस्थमिश्रिता यथा प्रबोधचन्द्रोदये विद्याप्रबोधोदयजन्मभूमिर्वाराणसीमुक्तपुरी निरत्यया अतः कुलोच्छेदविधिं विधि
त्सुर्निवस्तुमत्रेच्छति नित्यमेव सः एवं प्रयोगवशादन्यदप्युदाहरणीयम् एतेन समासरजातिमिश्रणएवोपजातित्वमिति द्वयोरे
वजात्योर्मिश्रेण उपजातित्वमिति च व्याचक्षमाणानां प्राचाम् ग्रंथो अनादरणीयः ॥०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

वृ० र० इन्द्रवज्रोपेन्द्रवज्रामात्रलक्षणाक पादोपजातिभेदसंख्यामाह एकत्रेति तयोरिन्द्रवज्रोपेन्द्रवज्रयोरन्यतरो भेद एकत्रि [illegible] पादे द्व
स० टी० योस्त्रिषु वा स्यात्तदा चतुर्दशोपजातयो भवन्ति यथा उइइइ १ इउइइ २ उउइइ ३ इइउइ ४ उइउइ ५ इउउइ ६ उउउइ [illegible] उइ
१२ इउ ९ इउइउ १० उउइउ ११ इइउउ १२ उइउउ १३ इउउउ १४ ॥ इति एतासां क्रमेण नामान्यपि आह कृते पिंगलेऽपि स्वयं यथा कीर्तिर्वा
णी माला शाला हंसी माया जाया बाला आर्द्रा भद्रा प्रेमा रामा ऋद्धिर्बुद्धीतास्तु नामा इति तत्राद्याया कीर्तेरुदाहरणं समानमेतस्मैमेकम
खः पितॄणां कन्यां कुलस्य स्थितये स्थितिज्ञः मेनां मुनीनामपि माननीयामात्मानुरूपां विधिनोपयेमे एवं वाराद्येष्वपि स्वयमुदा

एकत्र पादेऽक्षरणद्वये वा पादत्रये वाऽन्यतरः स्थितश्चेत् तयोरिहाऽन्यत्र ततो हि नो या चतुर्दशोक्ता उपजातिभेदाः
नजजलैर्गुरुरिता सुमुखी दोधकवृत्तमिदं भभभाद्गौ शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः वातोर्मीयं कथिता
म्भौ तगौ गः म्भौ न्लौ गः स्याद्भ्रमरविलसितम् रान्नराविह रथोद्धता लगौ ॥ हरिणीं दृष्ट्वा मा [illegible] नन्नगो रोदीरितेति मूलस्थो

कस्त्वः हाख्यानवमुपजातिः एकत्र पादे इति तु रामाख्या द्वादशी नजेति नगणजगणाभ्यां सहितैः जगणलघुगुरुभिः सुमुखी नाम
दोधकमिति भगणत्रयाद्गुरुद्वयेन दोधकं नाम वृत्तं भभभा इति समाहारे द्वंद्वः इति भट्टाः वस्तुतस्तु द्वन्द्व [illegible] एकवचनविषयत्वात् र० म० १२
ऽन्यत्राऽन्तरंगैकशेषप्रसंगेन तदभावादप्रसंगः कथमन्यथा करोति न्यादौ नद्वंद्वः तस्माद्भौ तरा भो भभ तु तन्तरा भो भभ इत्युत्तरपदलोपी
समासः शालिनीति मगणतगणद्वयेन गुरुद्वयेन च शालिनी नाम चतुर्भिः सप्तभिश्च यतिरिति विशेषः वातोर्मीति मगणभगणतगणैर्गु
रुद्वयेन शालिन्येव वातोर्मीति ज्ञेया म्भाविति मभनलघुगुरुभिर्भ्रमरविलासितं नाम रादिति रगणनगणरगणलघुगुरुभी रथोद्धता नाम

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वागतेति रगणनगणभगणेभ्यो गुरुद्वयेन स्वागता नाम ननेति नगणद्वयेन सगणेन गुरुद्वयेन च वृत्ता नाम यतिः शालिनीवत् नन
रेति नगणाभ्यां रगणलघुगुरुभिश्च भद्रिका नाम श्येनिकेति रगणजगणरगणलघुगुरुभिः श्येनिका नाम मौक्तिकेति भतनगणेभ्यो
गुरुद्वयेन मौक्तिकमाला नाम पंचसु षट्सु च यतिः संप्रदायात् उपस्थितमिति जसतगणेभ्यो गुरुद्वयेन चोपस्थितं नाम उपचित्रमि
ति त्रिभिः सगणैर्लघुगुरुभ्यां चोपचित्रा नाम पञ्चेति भगणनगणनगणेभ्यो गुरुद्वयेन च श्रीर्नाम पञ्चभिः षड्भिश्च यतिः जगत्यां द्वादशा
क्षरपादे चन्द्रेति रनभसगणैश्चन्द्रवर्त्म नाम चतुर्भिरष्टभिश्च यतिः जात विति जतजरगणैर्वंशस्थं नाम स्यादिति तगणद्वयेन जगण

स्वागतेति रनभाद्गुरुयुग्मं ननसगगुरुरचिता वृत्ता ननरलगुरुभिश्च भद्रिका श्येनिका रजौ रलौ गुरुर्यदा मौ
क्तिकमाला यदि भतनाद्गौ उपस्थितमिदं ज्सौ ताद्गकारौ उपचित्रमिदं ससमाल्गौ पञ्चरसैः श्रीर्भतनगगैः
स्यात् जगत्यां चन्द्रवर्त्म निगदन्ति रनभसैः जतौ तु वंशस्थमुदीरितं जरौ स्यादिन्द्रवंशा ततजैरसंयुतैः इह तोट
कमंबुधिसैः प्रथितं द्रुतविलंबितमाह नभौ भरौ वसुयुगविरतिर्नाम्यौ पुटोयम्॥ रगणाभ्यां च इन्द्रवंशा नाम ततजे
रिति नद्वंद्वः अपितृतरपदलोपी समासः ततो जशब्देन द्वन्द्वे ततजाविति द्विवचनान्तमुचितम् तृतीयाबहुवचनान्तपाठस्तु लेखक
प्रमादादिति तत्वम्॥ इहेति चतुर्भिः सगणैस्तोटकं नाम द्रुतेति नभभरगणैर्द्रुतविलंबितं नाम वसुयुगेति मगणद्वयेन यगणाभ्यां
च पुटो नाम अष्टभिश्चतुर्भिश्च यतिः भद्राक्षमुनिशरेति। पाठं कृत्वा सप्तभिः पंचभिश्च यतिरित्याहुः तच्चिन्त्यम् पुटो नाम्यौ रेति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

वृ॰र॰ सटी॰ १२

प्रमुदितेति नगणाभ्यां रगणाभ्यां च प्रमुदितवदना नाम नयेति नयनयगणैः कुसुमविचित्रा नाम रसैरिति जसगणौ नौ जसगणौ यत्र सा जलोद्धतगतिः रसा रसाश्च त्यवरोषेषु षड्भिः षड्भिर्यतिः भुजंगेति चतुर्भिर्यगणैर्भुजंगप्रयातं नाम रैरिति चतुर्भी रगणैः स्रग्विणी नाम भुवि तिनभजरगणैः प्रियंवदा नाम त्याविति तयतयगणैर्मणिमाला नाम गुहः स्वामिकार्तिकेयः सेनानीरग्निभूर्गुह इत्यमरः तस्य वक्त्रैः षड्भिर्यतिरित्यर्थः धीरैरिति नभजैरैर्ललिता नाम प्रमितेति यत्र सजौ सगणद्वयं च सा प्रमिताक्षरा नाम ननेति ननभ

प्रमुदितवदना भवेन्नौ रौ नयसहितौ न्यौ कुसुमविचित्रा रसैर्जसजसा जलोद्धतगतिः भुजंगप्रयातं भवेद्यैश्चतुर्भिः रैश्चतुर्भिर्युता स्रग्विणी संमता भुवि भवेन्नभजैरः प्रियंवदा त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः धीरैरभाणि ललिता तभौ जरौ प्रमिताक्षरा सजससैरुदिता ननभरसहिता महितोज्ज्वला पंचाश्वैश्छिन्ना वैश्वदेवी ममौ यौ अब्ध्यङ्गैः स्याज्जलधरमाला म्भौ स्मौ इह वनमालिका नजभयैः स्यात्॥ स्वरशरविरतिर्ननौ रौ प्रभा भवति नजावथ मालती जरौ नयुगरयुगयुक्तं गौ रमता॥

रगणैरुज्ज्वला नाम महिता श्रेष्ठा पञ्चेति मगणद्वयेन यगणद्वयेन च वैश्वदेवी नाम पञ्चभिः सप्तभिश्च यतिः ममाविति अपि पाठः ममौ याविति पाठस्तु श्रेयान् एवमग्रेऽप्यूह्यम् अब्ध्यङ्गेति मभसमगणैर्जलधरमाला नाम चतुर्भिरष्टभिश्च यतिः इहेति नजभयगणैर्वनमालिका नाम अष्टभिश्चतुर्भिर्यतिरिति प्राचः सूत्रानुयायिनस्तु पञ्चभिः सप्तभिश्चेति मन्यन्ते स्वरेति नगणद्वयेन रगणद्वयेन च प्रभा नाम सप्तभिः पञ्चभिश्च यतिः भवतीति नजजरगणैर्मालती नाम प्रभावद्यति

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अभिनवेतिननजयगणैस्तामरसंनाम पंचेतिभमससैर्ललनानामपञ्चभिः सप्तभिर्यतिः ललितमितिननमरैर्ललितंनामद्रु
तेतिनभजयैर्द्रुतपदंनाम अतिजगत्यांत्रयोदशाक्षरपादेवेदैरिति मतयसगुरुभिर्मत्तमयूरंनामचतुर्भिर्नवभिश्चयतिः यमाविति
यमररगुरुभिश्चंचरीकावलीनाम चतुरितिजभसजगुरुभीरुचिरानामचतुर्भिर्नवभिर्यतिः तुरगेतिननजनगुरुभिः क्षमानामसप्तभिः
षड्भिश्चयतिः सजेतिसजसजगुरुभिर्मंजुभाषिणीनामपंचभिरष्टभिर्यतिः॥ननेतिननतरगुरुभिश्चंद्रिकानामनवचतुर्भिर्यतिः म्ना

अभिनवतामरसंननजाद्यः पंचयुतिर्भ्मौ सात्सयुताललना ललितमभिहितंनौ म्रौ नामतः द्रुतपदंनभजयैः कलि
तंस्यात् अतिजगत्याम् वेदैरंध्रैर्म्तौ यसगा मत्तमयूरम् यमौ रौ विरमाता चंचरीकावली गः चतुर्ग्रहैरिति रुचिराज
भौ स्जगाः तुरगरसयतिर्नौ ततौ गः क्षमा सजसाजगौ भवति मंजुभाषिणी ननतरगुरुभिश्चंद्रिका चतुर्भिः म्नौ ज्रौ
गस्त्रिदशयतिः प्रहर्षिणीयं शक्वर्यां म्तौ न्सौ गौ वक्ष्यन्द्वविरतिः संबाधा ननरसलघुगैः स्वरैरपराजिता ननभन
लगिति प्रहरणकलिका उक्ता वसन्ततिलका तभजाजगौ गः सिंहोद्धतेयमुदिता मुनिकाश्यपेन॥

वितिमतनजरगुरु
भिः प्रहर्षिणीयंनामत्रिभिर्दशभिश्चयतिः॥ शक्वर्यांचतुर्दशाक्षरपादे म्तौ वितिमतनसैर्गुरुद्वयेन चाऽसंबाधानामपञ्चभिर्नवभिश्चयतिः ननेति
तिः ननरसलघुगुरुभिरपराजितानामसप्तभिः सप्तभिर्यतिः ननेति। ननभनलघुगुरुभिः प्रहरणकलिकानाम यतिः सप्तभिः उक्तेतितभज
जगुरुद्वयेन वसंततिलकानाम अस्या एव संज्ञान्तराणि मतभेदेनाह सिंहेत्यादि पादत्रयेण सिंहोद्धतेयमिति काश्यपः॥०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

वृ॰र॰
टी॰
१४

उद्धर्षिणीति सितवः मधुमाधवीति रामइतितिस्त्रोमनभेदेन संज्ञाज्ञेयाइत्यर्थः शोभावतीत्यन्ये इन्दुवदनेतिगुरुद्वयसहितैर्भजसनैरि
न्दुवदनानामद्विरिति मसमभैर्गुरुभ्यां चाऽलोलानामसप्तभिः सप्तभिर्यतिः अतिशक्वर्यांपंचदशाक्षरपादेद्विहतेतिद्विगुणिताः स
प्तचतुर्दशभवन्ति चतुर्दशलघुभिरेकेनगुरुणाचशशिकलानामसप्तभिरऽष्टभिर्यतिः स्रगितिषड्भिर्नवभिश्चयतौ शशिकलैवमाला
नाम वसुहयेति अष्टभिः सप्तभिश्चयतौ शशिकलायाएवमणिगुणनिकरइतिनाम ननेति ननमययैर्मालिनीनाम भोगिभिर्नो

उद्धर्षिणीयमुदिता मुनिसितवेन रामेणासैयमुदितामधुमाधवीति इन्दुवदनाभजसनैः सगुरुयुग्मैः द्विःसप्तच्छि
दलोला म्सौम्भौगौचरणे चेत् अतिशक्वर्यां द्विहतहयलघुरथगितिशशिकला स्रगितिभवति रसनवकयति
रियम् वसुहयपयतिरिहमणिगुणनिकरः ननमययपुत्तेयमालिनीभोगिलोकैः भवतिनजौभजौरसहितौप्र
भद्रकम् सजनानयौशरदशयतिरियमेला म्रौम्यौयान्तौभवेतां सप्ताष्टकैश्चन्द्रलेखा अष्ट्यांम्भौत्रिनगाः स्व
रात्वमृषभगजविलसितम् नजभजरैस्तदा भवति वाणिनीगयुक्तैः लघुगुरुनिरन्तरं यदासपंचचामरः

गैरष्टभिर्यतिरितियावत् लोकैः सप्तभिश्च यतिः भवतीति नजभजरैः प्रभद्रकंनाम सप्तभिरष्टभिश्चयतिः सजेति सजनयैरेलानाम
पंचभिर्दशभिर्यतिः म्राविति मरमयैर्यपैश्चन्द्रलेखानामयतिः सप्ताग अष्ट्यां षोडशाक्षरपादे म्भाविति भराभ्यां त्रिभिर्नैर्गुरुणा च ऋषभ
गजविलसितंनामस्वरात् सप्तभ्यः स्वविच्छेद इत्यर्थः नजेति नजभजरगुरुभिर्वाणिनीनाम लघुरिति पूर्वंलघुः पश्चाद्गुरुरितिपा

१४

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पंचेतिपंचभिर्भैर्गुरुणाचस्वगतिर्नाम अन्यष्ट्यांसप्तदशाक्षरपादे रसैरिति यमनसभलघुगुरुभिःशिखरिणीनामषड्भिरेका
दशभिश्चयतिः जसाविति जसाविति जसजसयलघुगुरुभिः पृथ्वीनाम अष्टभिर्नवभिश्चयतिः दिङ्मुनीतिभरनभनलघुगुरुभिर्वं
शपत्रपतितंनामदशसप्तचयतिस्थानम् रसेतिनसमरसलघुगुरुभिर्हरिणीनाम षड्भिश्चतुर्भिस्सप्तभिश्चयतिः मन्देति मभनततै
र्गुरुभ्यांचमन्दाक्रान्तानामचतुर्भिः षड्भिः सप्तभिश्चयतिः ह्येतिनजभजलघुगुरुभिर्नर्कुटंनामसप्तभिर्दशभिश्चयतिः मुनिगुहेति

पंचभकारस्युतास्वगतिर्यदि चान्तगुरुः अन्यष्ट्यां रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी जसौजसयलाव
सुग्रहयतिश्च पृथ्वीगुरुः दिङ्मुनिवंशपत्रपतितम्भरनभनलगैः रसयुगहयैन्सौम्रौस्लौगो यदा हरिणी तदा
मन्दाक्रान्ताजलधिषडगैर्म्भौनतौताद्गुरूचेत् हयदशभिर्नजौभजजलागुरुनर्कुटकम् मुनिगुहकार्णवैः
कृतयतिर्वद कोकिलकम् धृत्यांस्याद्भूतत्त्वैरश्वैः कुसुमितलतावेल्लिता म्तौनयौयौ मात्मौजौभरसंयुतौ कारि
वाणैके हरिणप्लुतम् यदि हनयुगलन्तौवेदरस्पैर्महामालिका पंचभकारकृतास्वगतिर्यदिचान्तसनिरता अति
धृत्यांनयुग्गयुरुर्लघुर्निरन्तरंयत्रासपंचचामरः॥ सप्तभिर्गुहकैः स्कंदशिरोभिः कंशिरोजलमाख्यातमित्यभिधानं षड्भिरि
तियावत् चतुर्भिश्चयतिश्चेन्नर्कुटकमेवकोकिलकंनामवदेतिशिष्योपदेशः धृत्याम् अष्टादशाक्षरपादे स्यादिति मतनयययैः कुसु
मितलतावेल्लितानामपंचभिः षड्भिः सप्तभिश्चयतिः मादितिमसजजभरैर्हरिणप्लुतंनामअष्टभिः पंचभिश्चयतिः। यदीतिनाभ्यांचतु
र्भिश्चैरश्वमहामालिकानामपंचेति पंचभिर्भैः सगणेनचाऽस्वगतिर्नाम अतिधृत्यामेकोनविंशत्यक्षरपादेनयुगेतिनाभ्यामरगुरुस्त

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रसैति यमनसररगुरुभिर्मेघविस्फूर्जितानाम षड्भिः षड्भिः सप्तभिश्च यतिः सूर्यैरिति मसजसततगुरुभिः शार्दूले विक्रीडितं नाम द्वादशभिः
सप्तभिश्च यतिः कृत्यां विंशत्यक्षरपादे ज्ञेयाइति मरभनयभलघुगुरुभिस्सुवदनानाम सप्तभिः सप्तभिः षड्भिश्च यतिः त्रिरितिरजरजरजगु
रुलघुरूपेणलक्षणेन वृत्तं नाम त्रिरिति सुजन्तान्त्रिवारं रगणजगणावित्यर्थः संहितायां ढलोपे इति दीर्घः प्रकृत्यामेकविंशत्यक्षरपा
दे म्रभ्नैरिति मरभनययययैः स्रग्धरानाम त्रिवारं सप्तसु यतिः आकृत्यां द्वाविंशत्यक्षरपादे भ्राविति भरनरनरनगुरुभिर्मद्रकं नाम द

रसर्त्वश्वैर्यम्नौ म्रौ स्गुरुयुता मेघविस्फूर्जिता स्यात् सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् कृत्यां ज्ञेया
सप्ताश्वषड्भिर्मरभनययुता भ्लौ गः स्सुवदना च्चीरजौ गलौ भवेदिह हि शनलक्षणेन वृत्तनाम प्रकृत्यां म्रभ्नैर्यानां
त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् आकृत्यां भ्रौ नरना रना व्यथ गुरुर्दिगर्कविरमं हि मद्रकमिदमवि
कृत्याम यदिह नजौ जो भ्जौ भलगा कलदाश्वललितं हरार्कयति तं मत्ताक्रीडा म्मौ त्लौ नौ न्लौ गिति भवति वसुशरदश
भ यतियुता संस्कृत्यां भूतमुनीनैर्यतिरिह भतनाः स्भौ भनयाश्च यदि भवति तन्वी ॥ शभिर्द्वादशभिश्च यतिः विकृत्या
म् त्रयोविंशत्यक्षरपादे यदिहेति नजभजभजभलघुगुरुभिरश्वललितं नाम एकादशभिर्द्वादशभिश्च यतिः मत्तेति म्रौ वसुपंचदशसु १५
चयतौ सत्यां मभतनननलघुगुरुभिर्मत्ताक्रीडानाम अष्टाभिः पंचभिर्दशभिश्च यतिरिति व्याचक्षाणः सुहृद्गणस्तु शरेति भिन्नयति
स्थानमिति वभ्राम यतो हि सूत्रकारः मत्ताक्रीडा म्मौ त्लौ नौ न्लौ ग्वसुपंचदशकाविति अत्र हि वसुपंचदशकाविति द्विवचनांतं पंच
दशयतिः एतत्सूत्रविरोधादेव मत्ताक्रीडमिति नपुंसकपाठोपि तदुक्तः प्रत्युक्तः संस्कृत्यां चतुर्विंशत्यक्षरपादे ॥०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूतेति भतनसभभनयैस्तन्वी नाम भूतानि पंच तत्संकलिता भुनयो द्वादश भवन्ति तैर्यतिः इनैः सूर्यैः पुनर्द्वादशभिर्यतिरित्यर्थः यत्तु पंचभिस्स
प्तभिर्द्वादशभिश्च सुस्वरणादयोप्याचख्युस्तत्सूत्रविरुद्धम् तथा च सूत्रं तन्वी भ्तौ न्सौ भौ न्यौ द्विरादित्याः इति अतिकृत्यां पंचविंशत्यक्षरपादे
क्रौंचेति भमसभनननगुरुभिः क्रौंचपदा नाम पंचभिः पंचभिरष्टभिश्च सप्तभिश्च यतिः उत्कृत्यां षड्विंशत्यक्षरपादे वस्विति मममतननन
नरसलघुगुरुभिर्भुजङ्गविजृम्भितं नाम अष्टभिरेकादशभिः सप्तभिश्च यतिः मइति मगणो न षड्भिर्नगणैः सगणो नगुरुभ्यां चापवाहा
ख्यं नवसु षट्सु षट्पंचसु यतिः इत्युक्तादिषड्विंशतिभेदाः अथ दण्डकानाह यदिहेति नगणाभ्यां सप्तभी रगणैश्चण्डवृष्टिप्रयातो

अतिकृत्यां क्रौंचपदा भ्मौ स्भौ नननान्गा विषुशरवसुमुनिविरतिरिह भवेत् उत्कृत्यां वस्वीशाश्वच्छेदोपेतं
ममतनयुगनरसलगैर्भुजंगविजृम्भितं मोनाः षट्सगागिति यदि नवरसरसस्वरयतियुतमपवाहाख्यम्
यदि नयुगलं ततः सप्तरेफास्तदा चंडवृष्टिप्रयातो भवेद्दंडकः प्रतिचरणविवृद्धरेफैः स्युरर्णार्णवव्यालजी
मूतलीलाकरोद्दामशंखादयः ॥ २ ॥ नामदंडको भवेत् दंडकानामपि समवृत्तत्वादेकेनैव पादेन लक्षितोयं प्रतिचरणे

ति प्रति दण्डकं चरणेषु विवृद्धैः रगणैरर्णादयो दण्डका ज्ञेयाः अत्रायम्मामकः संग्रहः चण्डवृष्टिप्रयातास्माद्दण्डको नगणद्वयात्
रगणैस्सप्तसंख्यैस्स्यादर्णस्त्वष्टभिरुच्यते अर्णवो नवभिर्ज्ञेयो व्यालस्तु दशभिर्भवेत् ॥ जीमूत एकादशभिः सूर्यैर्लीलाकरो भवेत् त्र
योदशभिरुद्दामः शंखनामा ततस्स्मृतः स चतुर्दशभिर्ज्ञेयस्ततः पंचदशादिभिः आगमाद्याश्च विज्ञेया दण्डका रगणैर्युताः आद्यद्वयो
रुदाहरणे मल्लेप्रदर्शिते अर्णोवायं यथा मत्कृतजसवन्तभास्करे नरवरजसवन्तसिंहस्य बुन्देलचूणामणेः सोप्यनो ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

र्णवमध्याह्नमार्त्तण्डं चण्डद्युतिः गगनगकरवालकालस्वरूपाम्बुदः पूरितारातिसामन्तसीमन्तिनीनेत्रनीरापगः रिपु[illegible]धरकी
र्तिमूर्तिस्फुरत्कौमुदीसम्भृणोति स्वयं स्वर्णसन्तुष्टिसौदामिनीमण्डितः कलयति च सपत्नभूपप्रतापालिदावानलज्वालया दह्य
मानं जगच्छीतलत्वं धारया एवमन्यान्याद्यपि स्वयमुदाहरणीयं २ प्रचितेति नगणद्वयात्परं सप्तभिर्यगणैः प्रचितकनामा दण्डकः
प्रचितक इति समभिधा यस्य इति विग्रहः उदाहरणान्त्वेतदेवेत्यन्येषामपि गणानामुपलक्षणकम् कविप्रयोगात्तद्यदि

प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डको नद्वयादुत्तरैः सप्तभिर्यैः ३ इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकरे
समवृत्ताभिधानः तृतीयोऽध्यायः ३ विषमे यदि सौ सलगा दले भौ युजि भाद्गुरुकावुपचित्रम् भत्र
यमौ जगतौ गुरुणी चेत् युजि च नजौ ज्यौ द्रुतमध्या सयुगात्सगुरुर्विषमे चेत् भाविह वेगवती युजि भा
द्भौ ञ्चौ जतपरौ जरौ गुरुश्चेत् म्सौ जौ गभद्रविराड्भवेदनोजे ञ्सौ समे सजौ सगुरुयुक्तौ केतुमती समे भरनगाद्गुः ॥

तानामपि दण्डकानामिष्टत्वात् अत्र चण्डवृष्ट्यादिविगणनृह्या दण्डकभेदा ज्ञेयाः अनुक्तनाम्नां दण्डकानां प्रचित इत्येव संज्ञा नतु क १६
म सूत्रकारेण शेषं प्रचितमिति ३ ॥ इति श्रीवृत्तरत्नाकरसेतौ तृतीयोऽध्यायः ३ ॥ अथार्द्धसमवृत्तान्याह विषमे इति प्रथमतृतीयरूपे
विषमपादे सभगलघुगुरवः समे द्वितीयचतुर्थरूपे तु त्रयो भगणाः द्वौ गुरू च तत्तु उपचित्रं नामार्द्धसमत्वादर्द्धमुदाहृतम् एवमुत्तरत्रापि भत्र
यमिति विषमे त्रिभिर्भगणैर्गुरुभ्यां च समे नजजयैर्द्रुतमध्या नाम सयुगादिति विषमे त्रिभिः सगणैर्गुरुणा च समे त्रिभिर्भगणैर्गुरुभ्यां च
वेगवती नाम भाज इति विषमे तजरगुरुभिः समे मसजैर्गुरुभ्यां च भद्रविराट् नाम असम इति विषमे सजसगुरुभिः समे भरनैर्गुरुभ्यां च के

न्याख्यानिकीतियद्यविषमेद्वौतगौणोजगणोगुरुश्चसमेचजतजगुरवोगुरुश्चतदाख्यानिकीनाम जनावितिविषमेजततजगुरुभिर्गुरुणा
समेततजगुरुभिर्गुरुणाविपरीताऽऽख्यानिकीनाम सयुगादितिविषमेत्रिभिःसगणैर्लघुगुरुभ्यांचसमेनभभरैर्हरिणप्लुतानाम अयुजीति
विषमेननरलघुगुरुभिःसमेनजजरैरपरवक्त्रंनाम अयुजीति विषमेननरये समेनजजरगुरुभिः पुष्पिताग्रानामवदन्तीतिअपरवक्त्र
स्यैवैतालीयमितिसामान्यसञ्ज्ञामेवपण्डिताआहुः तद्लक्षणाक्रान्तत्वात् एवंपुष्पिताग्रायाः औपच्छन्दसिकसञ्ज्ञाहुः चिन्त्यएड

आख्यानिकीतौजगुरूगमोजेजतावनोजेजगुरूगुरुश्चेत् जतौजगौगोविषमेसमेस्यात् तौजौगएषावि
परीतपूर्वासयुगात्सलघूविषमेगुरुयुजिनभौचभरौहरिणप्लुता अयुजिननरलाङ्कुरस्समेजमपरवक्त्रमि
दंनतोजरौ अयुजिनयुगरेफतोयकारोयुजिचनजौजरगाश्चपुष्पिताग्रा वदन्त्यपरवक्त्राख्यमैतालीयंवि
पश्चितः पुष्पिताग्राभिधंकेचिदौपच्छन्दसिकंतथा विषमेससजागुरूसमेचेत् सभरायश्चवसन्तमालिकासा
स्यादयुग्मकेरजौरजौसमेजरौजरौगुरुर्यवात्यरामतीयम्॥ इ॰वृ॰र॰ चतुर्थोऽध्यायः४॥ तान्याहुरित्यर्थः विषमइ

तिविषमेसगणद्वयंजगणोगुरुश्चसमेसभरयगणायस्याःसावसन्तमालिकानामस्यादिति विषमेरजरजयुतासमेजरजरगुरुयुताय
वाद्यवशाद्यात्यरामतीयवमतीनाम्नीभवेदित्यर्थः यत्र स्यात्अभरावतीतिनामेति सुल्हणास्तत्रमूलंचिन्त्यम् यदपिस्यादित्यस्यभवा
तीतिव्याख्यानंतेनाकारितदपिनिर्मूलंलिङ्गविध्यर्थेलेनवर्तमानार्थद्योतकतायास्त्वभावात् नहिस्यादित्यस्यविभक्तिप्रतिरूपा
कताभवतीत्यतद्यथकाव्यविष॥०

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पत्वेप्रमाणमस्तीतिप्रपंचितमस्माभिर्णीयपरिभाषाभास्करे स्माभिः इति चतुर्थोऽध्यायः ४ अथ विषमवृत्तान्याह मुखपाद इति प्रथमः पादोऽष्टभिर्वर्णैर्द्वितीयो द्वादशाक्षरैस्तृतीयः षोडशाक्षरैश्चतुर्थो विंशत्यक्षरैरित्येवं चतुर्भिर्वर्णवृद्ध्या पादास्तु सद्भिर्विरचितपादः संजातः सोन्दर्ययपदचतुरूर्द्ध्वंनाम अत्र गुरुलघुनियमो नास्तिमितिपादचतुर्वृद्ध्यापदचतुरूर्ध्वमितिसामान्यतः सत्लकारोक्तेः अस्य भेदमाह प्रथममितिति प्रथममुदितवृत्ते चतुरूर्द्ध्वनामके पादोक्तवर्णपूर्तसंख्येषु मध्यप्रतिपादमन्त्यौ द्वौ वर्णौ यदि गुरू स्यातामन्त्यात

मुखपादोऽष्टभिर्वर्णैः परस्तु मेकरालयैः क्रमाद्वृद्धा सततं यस्य विचित्रैः पादैः संपन्नसौन्दर्यौ नत्वुदितममल मतिभिः पदचतुरूर्द्ध्वमिधम्वृतम प्रथममुदितवृत्ते विरचितविषमचरणभाजि गुरुकयुगलनिधनं इह सहिता आङा लघुविरचितपदविततियतिरितिभवतिपीडः। प्रथममितरचरणसमुत्थंश्रयतिस यदि लक्ष्म इतर दितरगदितमपि यदि च सम्यक् चरणयुगलकमविकृतम परमितिकलिकासा २॥ स्याऽऽपीडइतिनामतदाहगुरुके तिगुरुरेवगुरुकस्तद्युगलं निधनअन्तो यस्यआङोपसर्गेणसहितः पीडआपीडोभवतीत्यर्थः तस्यैवविशेषणम् लघुविरचितेत्यादि अन्येगुरुद्वयनियमात्पूर्वेलघुरचनाप्रतीयतेसा चश्रुतिसुखदाद्यतिविशिष्टेतिभावः आपीडितस्यभेदमाह प्रथममिति प्रथमं चरणमन्यः पादइतरचरणसमुत्थान्द्वितीचरणसमुत्थंलक्षणन्द्वादशाक्षरस्वरूपंश्रयति अवलम्बतेइतरद्द्वितीयपादइतरदितस्त्रयथमपादगदि तमष्टाक्षरस्वरूपंलक्षणमवलम्बतेऽयमर्थः आपीडस्यपदाप्रथमद्वितीयौचरणौमत्ययरचितौतृतीयचतुर्थौतुयथास्थितावेवतदा कलिकानामेति। अस्यामंजरीतिनामेतिसूत्रकारः यत्तुकलिकामंजर्योः पर्य्यायत्वमितिसुत्त्वणसन्मामादिकं कलिकाकारकायुमाति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतेनस्फुरतत्कुचकुम्भयोरुपरिमणिमंजरीत्यादिद्वादशसर्गगतगीतगोविन्दस्याऽष्टपदीव्याख्याने रत्नलतेतिजगद्वरोत्तमणिमं
जरीपदव्याख्यानमपिपराकृतंहिगुर्विति प्रथमचरणेनसानान्यलक्षणाऽनुवादस्छंदः पूरणायपस्यास्तृतीयपादः प्रथमपाद
स्यमष्टाक्षरलक्षणमवलम्बतेशेषमग्रागवत्सालवलीनामदाक्षिणात्येवुराय आवलीतिभाषयाप्रसिद्धालवलीत्युच्यतेहरफारेव
रीत्यन्यदेशभाष यात्प्रसिद्धातयाचरत्नाकरनिघण्टेवातलङ्कुफपितग्रंसुगन्धिलवलीफलमितिएतेनलवलीलुवलीलाभिर्लास्यलो
लालयंकिलेतिभगवद्यासोक्तिर्व्याख्याताएवंचलवल्यऽलावुलेताविशेषावेतिकेषांचिद्व्याख्यानमज्ञानमूलकमेवेतिनादरणीयम् ॥

द्विगुरुप्लुतसकलचरणान्तासुखचरणगतमनुभवतिचतृतीयं चरणमिहहिलक्ष्मकृतमखिलमपियदिदम
नुभवतिचलवलीसा ४ प्रथममधिवसतियदितुर्यंचरमचरणपदमवसितिगुरुयुग्मम् अखिलमपरमुपा
श्रितमितिललितपदयुक्तातदियममृतधारा ५ ॥ प्रथममिति यस्याश्चतुर्थचरणः प्रथमपादस्यमऽष्टाक्षरलक्षण
मवलम्बतेशेषमग्रागवत्साभृतधारानाम अवसेनीन्पाद्यप्यनुवादः पूर्ववत् अत्रकलिकायामाद्यः पादोद्वादशाक्षरोद्वितीयोष्टाक्षरस्तृ
तीयः षोडशाक्षरश्चतुर्थोविंशत्यक्षरः लवल्यान्द्वादशाक्षराद्यः षोडशाक्षरोद्वितीयोऽष्टाक्षरस्तृतीयोविंशत्यक्षरश्चतुर्थः अमृतधा
रायान्द्वादशषोडशविंशत्यष्टाक्षराः क्रमेणपादाः प्रथमस्यविपर्यासे मंजरीलवल्यमृतधाराइत्यत्रस्तेप्रथमस्यविपर्यासमा
त्राभिधानात्सामान्यत्रक्राम्यनुज्ञानान्निष्कर्षइतिभट्टकेदाराभिप्रायः ॥ इतिपदचतुरुर्द्ध्वप्रकरणम् ॥० ॥० ॥० ॥० ॥०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृ॰र॰
टी॰
१८

सजसमिति यस्याश्चादिमे प्रथमे पादे सगणजगणौ सगणलघू च अथ द्वितीये पादे नगणसगणजगणगुरवश्च अथो [illegible] गणनग
णजगणलघुगुरवश्च चतुर्थे सगणजगणसगणजगणगुरवः सा उद्गता नाम अस्याः पूर्वार्द्धे यतिनियममाह चरणमेकत इति [illegible]मं चरणं
द्वितीयेन सहैकेनाऽविलम्बेन पठेत् अर्द्धेऽन्ये यतिरिति भावः चरणेति यस्यास्तृतीये पादे रगणनगणभगणगुरवः शिष्टमुद्गतावत् तत्सौ
रभकं नाम नयुगमिति यस्यास्तृतीये पादे नगणद्वयं सगणद्वयञ्च शेषं पादत्रयं उद्गतावच्चेत् ललितनाम इत्युद्गतानाम्प्रकरणम् म्सा।

सजसादिमे सलघुकौ च नसजगुरुकैरथोद्गता त्र्यङ्घ्रिगतभनजलागयुताः सजसा जगौ चरणमेकतः पठेत्
चरणत्रयं व्रजति लक्ष्म यदि सकलमुद्गतागतम् नौ भगौ भवति सौरभकम् चरणं यदीह भवतस्तृतीयके नयुगं
सकारयुगलञ्च भवति चरणे तृतीयके तदुदितमुरुमतिभिर्ललितम् यदि शेषमस्य खलु पूर्वतुल्यकम् इत्युद्गता
प्रकरणम् म्सौ जभौ गौ प्रथमाङ्घ्रिरेकतः पृथगऽन्यत् त्रितयं सनजरगास्ततो ननौ सः त्रिनपरिकलितजयौ प्रचुपि
तमिदमुदितमुपस्थितपूर्वकम् नौ पादेऽथ तृतीयके स तौ न सयुक्तौ ॥ वितियत्र प्रथमपादे मसजभा गुरुश्च द्वितीये सन १८

जरगुरवः तृतीये द्वौ नगणौ सगणश्च चतुर्थे त्रयो नगणा जगणयगणौ च तदुपस्थितप्रचुपितं नाम प्रथमं चरणं पृथक् पठनीयम् न तु
तावद् द्वितीयेन सहाऽविलम्बेनाऽन्यत् त्रितयं चरणत्रयं त्वेकत एकेनाऽविलम्बेनेत्यर्थः नौ पादे इति यस्यास्तृतीये पादे द्वौ न
गणौ सगणनगणौ नगणसगणौ चेति षड्गणाः शेषपादत्रये उपस्थितप्रचुपितवद् वर्द्धमानं नाम लघुसुन्दरं वृत्तं पिंगलादिगदि
नमः त्र प्रथमाङ्घ्रिर्वक्ताय तिश्चन्तावद्वर्द्धमानमिति ॥ श्री ॥ श्री ॥ श्री ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चेत्तच्छब्दार्थे स्तु शब्द इति पूर्वेयतेरनुवादो नानन्वितः। एवं सति प्रथमांघ्रिकृतयतीहेति सुधीतः पाठान्तरकल्पनापि न यथाश्रुतपाठान्यसामंजस्ये सहृदयचमत्कारमावहति भट्टास्तु प्रथमांघ्रिकृतयतिस्त्वित्येकम्पदम् तच्च किं वर्णं यत्या श्लाघ्यते प्रशस्यत इति व्युत्पत्तेः नुगऽभावत्वाऽऽगमशास्त्रस्याऽनित्यत्वादित्याहुः स्यादेतत् यदि कर्मणि क्तिः स्यात् स एव हि तत्र दुर्लभः कर्तरि क्तिरिति कर्तर्येव तत्र वृत्तेः यत्तु सुत्त्वाणाः प्रथमांघ्रिकृतयतिरिति क्रियाविशेषणमित्याह तन्मृदु पचतीत्यादिवत् क्रियाविशेषणानां नपुंसकत्वमिति स्मरणान्नपुंसकत्वापत्तेः दृष्टापत्तौ छन्दोभङ्गः स्तस्मादऽस्मदुक्तं युक्तम् अस्मिन्निति अस्मिन्नुपस्थितप्रचुपितेऽयदि तृतीये तजरगणाः

प्रथमांघ्रिकृतयतिस्तु वर्द्धमानम् त्रितयमऽपरमऽपि पूर्वे सदृशमिह भवति प्रवरमतिभिरिति गदितं लघुवृत्तम् अस्मिन्नेव तृतीयके यदा तजरस्सुः प्रथमे च विरति रार्षभं ब्रुवंति तच्छुद्धविराट्पुरःस्थितां त्रितयमपरमपि यदि पूर्वे समं स्यात्॥ इत्युपस्थितप्रचुपितप्रकरणं विषमाऽक्षरपादम्वा पादैरऽसमन्दशधर्मवत् ॥०

सुः शिष्टेषु पादेषूपस्थितप्रचुपितवल्लक्षणम् प्रथमपादे यतिस्त्वत्र तच्छुद्धविराडार्षभं नाम ऋषभमेवार्षभं स्वार्थिकोऽण् छन्दः शास्त्रायनस्यानन्तरमिति ध्येयम् येन तु प्रथमे यता वार्षभं प्रतिपादे यतो शुद्धविराडिति छन्दोभेदमाहुस्तेऽप्रमाणाभावादुपेक्ष्याः इत्युपस्थितप्रचुपितप्रकरणं अथाऽवुक्तछंदसो लक्षणमाह विषमेति क्रमभेदात् संख्याभेदाच्च विषमाणि अक्षराणि लघुगुरूणि येषु ते विषमाक्षराः पादा यस्मिन् तत् तथोक्तम् वा अथवा पादैश्चतुःसंख्याकपादैः श्रीप्रभृतिभिर्विसदृशं षड्विंशत्यादिसंख्यापादैर्विशिष्टमित्यर्थः ॥ ॥०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृ.र.
टी.
१९

तदेवाह यच्छन्दोनेनियच्छन्दः प्राङ्नोक्तन्तस्य गाथेतिनामेत्यर्थः यत्तु पद्चतुर... नागाथात्वं निवारयितुमाह यदिति त्याहुः
तच्चिन्त्यम् पादैस्समिमित्यनेनैव तेषां गाथात्वस्य निरस्तत्वात् वस्तुतस्तु यच्छन्द इत्यादिनैव गाथा लक्षणं विषमत... लेकं द्व
णीतिइत्यादिवदनुवाच्छन्दः पूरणायेति ज्ञेयम् यदुक्तं सूत्रकारेणान्यथानुक्तं गाथेति विषमाक्षरपादत्वेलियमेवकारिकोदाहरणा
क्रमेणाऽष्टदशसप्तनवाक्षरपादघटितत्वात् एतेन देवासुरमभूद्युद्धम्पूर्णमब्दशतम्पुरा महिषेसुराणामधिपे देवानांच पुरन्दरे इति
मार्कण्डेयपुराणस्याख्यातएवंसति तद्व्याख्यातॄणां छांदसत्वकल्पनानवद्येपापादैस्समिमित्यस्योदाहरणप्रदर्शनमपि जानी
ते दशधर्म्मं वदिति दश धर्म्मशब्दवती भारतस्याषट्पदीगाथोदाहरणमित्यर्थः यद्वा दशधर्म्मं वदिति मतुवल्लदशधर्म्मशब्दविशिष्ट

यच्छन्दोनोक्तमत्रगाथेतितत्सूरिभिः प्रोक्तम् दशधर्म्मं न जानन्ति धृतराष्ट्र निबोध तान् मत्तः प्रमत्त उन्मत्त
श्रान्तः क्रुद्धो बुभुक्षितः ॥

भारतस्थंवाक्यंगाथासंज्ञकमस्तीत्यर्थः तदेवगाथावाक्यं लिखति । दशधर्म्ममितिमत्तः सुरादिपानात् प्रमत्तोऽ
नवधानात् उन्मत्तो भूताद्यावेशात् स्पष्टमन्यत् एतेन शब्दतो वार्थतो वापि मनाक्का व्यार्यस्य सूचनम् पञ्चाऽष्टभिर्वा दशभिरष्टादशभिर्
वाषड्विंशत्या पादैर्वापिस्तानां... परिकीर्तिते त्यादिसंगृहीतमत्रसमस्तछन्दसामप्युक्तद्विजातिप्रयुक्तानां कविप्रयोगेषु दृश्यमानानां
तत्पुरंध्रिमत्मामित्यादीनामेवगाथात्वमाहुः अन्येतु तेषामुक्तादिसंज्ञाभिरुक्तत्वेनानुक्तत्वाभावान्नगाथात्वमन्यथोक्तादिसंज्ञाना
मनवकाशत्वइति प्रतिपेदिरे प्राक्तैतत्वार्य्या याएवगाथात्वमुक्तम् यद्वमेवारहमतादूपेस्मटराहाईसंजुताजहपहमन्तहतोम्नन्दूपं

वृत्तरत्नाकरटीका १९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिसञ्ज्ञानाम्प्रायुक्तानांछन्दसामुदाहरणानिसंस्कृतवत्प्राकृतादावपिकर्पूरमंजर्य्यादिग्रन्थेभ्योयथासम्भवंस्वयमूह्यानिउक्तं
चसरस्वतीकण्ठाभरणे संस्कृतेनैवकेप्याहुः प्राकृतेनैवकेचन साधारण्यादिभिः केपिकेचनम्लेच्छादिभाषया नम्लेच्छितव्यंयज्ञा
दौस्त्रीषुनाप्राकृतम्वदेत संकीर्णंनाभिजातेषुनाप्रबुद्धेषुसंस्कृतंदेवाद्याः संस्कृतम्प्राहुः।प्राकृतंकिन्नरादयः॥ पैशाचाद्यांपिशाचा
द्यामागधंहीनजातयः॥ इतिश्रीमदग्निहोत्रिकुलतिलकायमानश्रीमद्याजिभट्टसूनुभास्करविरचितेवृत्तरत्नाकरसेतौगाथालक्ष
णम्पंचमोऽध्यायः ५॥ अथप्रायुक्तछन्दसांभेदादिज्ञानायषट्प्रत्ययानाह॥ प्रस्तारइति॥ छंदसांभेदादिप्रत्यायकत्वात्प्रत्ययाःअ

त्रमाणाश्वभीरुश्चलुब्धःकामीचतेदश ॥ इतिश्रीभट्टकेदारविरचितेवृत्तरत्नाकरेपंचमोऽध्यायः५
प्रस्तारोनष्टमुद्दिष्टमेकद्व्यादिलगक्रिया संख्यानमध्वयोगश्चषडेतेप्रत्ययाःस्मृताः१ पादेसर्वगुरावाऽऽ
द्यात्लघुंन्यस्यगुरोरधः यथोपरितथाशेषम्भूयःकुर्यादमुम्विधिम् २

यनष्टादीनांप्रस्तारज्ञानाधीनत्वादादौप्रस्तारमाह पादेइत्यादिपद्यद्वयेनआद्यपंक्तौसर्वगुरौपादेलिखितेततोद्वितीयपंक्तौप्रथमपं
क्तिप्रथमगुरोरधोलघुंलिखित्वाऽवशिष्टपादाक्षराणिप्रथमपंक्तिस्थाक्षरतुल्यानिलिखेत् अथतृतीयपंक्तौद्वितीयपंक्तिस्थगुरूणा
म्मध्येआद्याद्गुरोरधोलघुंलिखित्वाऽवशिष्टानिपादाक्षराणिद्वितीयपंक्तिस्थाक्षरतुल्यानिलिखेदित्येवमेवलेखनविधिम्पुनःपुन
श्चतुर्थ्यादिपंक्तिषुकुर्य्यादित्यर्थः॥ २॥०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

छं॰ र॰ ननु द्वितीयादिपंक्तौ पादवर्णेषु ऽऽद्यस्य गुरुत्वाऽभावेन तस्याऽधस्तनीयादिपंक्तिषु किं लेख्यमित्याशंक्याह ऊनइति द्वितीयाऽऽदिपंक्ति।
स॰ स्थगुरुघाद्यगुरोरधस्तनीयादिपंक्तौ लिखिताद्यघो पूर्वस्मिन्स्थाने गुरून्वलिखेदित्यर्थः प्रस्तारस्याऽवधिमाह यावदिति अत्रपा
२० देइत्युपलक्षणम् तेनाऽर्द्धसमवृत्तेऽर्द्धइति विषमवृत्ते श्लोके इत्यपि ज्ञेयम् यदाहुरर्द्धसमप्रस्तारेऽर्द्धप्रस्तारइत्यादि प्रस्तारमुपसंहरति
प्रस्तारोयमिति प्रस्तरणंप्रस्तारः यत्तुप्रस्तार्यतेऽनेनेतिप्रस्तार इतितच्चिंत्यम् सोयंछन्दश्शास्त्रवोद्धृभिरुक्तइत्यर्थः तत्रोक्तायाद्वौ भे

॥ ऊनेदद्याद्गुरूनेवंयावत्सर्वलघुर्भवेत् प्रस्तारोयंसमाख्यातश्छन्दोविचितिवेदिभिः ३ ॥

दौ स्यणवेव [ऽ ।] त्युक्तायाश्चतुर्भेदः प्रस्तारोयथा [ऽऽ ।ऽ ऽ। ।।] मध्यायाश्चाष्टभेदाः प्रस्तारोयथा एषामेवाष्टभेदानाम् क्रमेणामयरसतजभ
नाश्चाष्टौसंज्ञाप्रागभिहिता एवम्प्रतिष्ठादीनांषोड़शादिभेदाभवन्तीति पूर्वजात्यऽपेक्षयोत्तरोत्तरंजातेर्द्विगुणाभेदाज्ञेयाः एका
ऽक्षरादिषड्विंशत्यन्त्यजातिप्रस्तारपिण्डसंख्याक्रमात्कौक्तिकेषड्विंशतिःसप्तशतानिचैवतथासहस्राण्यपिसप्तपंक्तिः॥ २०

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९
२	४	८	१६	३२	६४	१२८	२५६	५१२	१०२४	२०४८	४०९६	८१९२	१६३८४	३२७६८	६५५३६	१३१०७२	२६२१४४	५२४२८८

२०	२१	२२	२३	२४	२५	२६	[illegible] पिंड
१०४८५७६	२०९७१५२	४१९४३०४	८३८८६०८	१६७७७२१६	३३५५४४३२	६७१०८८६४	१३४२१७७२६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्स्राणि द्वेवेद्सुसं मितानि कोट्यस्तथा राममनिशाकरैः स्मृरिति १३४२१७७२६ प्रस्तारस्य क्रमे बीजं नोचुः प्राञ्चोऽत्र यद्यपि स्पष्टता
यास्तथापि अस्मिन्नद्रामिस्तु धियामुदे सर्वगुरुपादस्य भेदाकांक्षायां द्वितीयपंक्तौ प्रथमस्थान एवोपस्थितत्वात् गुरुनिरासपूर्वल
घुप्रयोगेन सर्वगुरुपादो भिद्यते इति तस्यादौ कल्पनं ततस्तृतीयपंक्तौ द्वितीयस्थाने गुरुनिरासपूर्वं लघुप्रयोग इति द्वितीयो भेदः।
अस्यैव शेषभूतस्तुर्थपंक्तिस्थस्तृतीयो भेद इति तस्य कल्पितम् ततः पञ्चमपंक्तौ तृतीयस्थाने तथैव लघुप्रयोगाच्चतुर्थस्य अ
स्यैव च द्विगुर्वादेस्त्रयोऽन्ये भेदाः लघुगुर्वादिर्गुरुलघ्वादिर्लघुद्वयादिश्चेति अन्त्यं सर्वगुरूणां प्रथमेन सहितेषु मध्यमाया अष्टभेदेष्व
ष्टसु क्रमे बीजमुक्तम् एवं प्रतिष्ठादिप्रस्तारक्रमेप्युन्नेयम् अथ मात्राप्रस्तारः तत्र प्रथमपंक्तौ स्याद्गुरुपादस्तु पूर्ववत् द्वितीयपंक्तौ
प्रथमाद्ऽधो लेख्यो लघुर्गुरोः यथोपरि तथा शेषमूनस्थाने लघुं न्यसेत् तृतीयादिषु पंक्तिष्वेवमेव गुरोरधः लघुं न्यस्या
ऽवशिष्टन्तु पूर्ववत्परिवर्तितम् न्यूने मात्रात्रयं देयं तस्मिन्नूर्ध्वयोर्गुरुद्वयोः कलयोः स्यात्ततः पूर्वं लघुर्देयो भवेत्ततः चतुर्थपंक्ता
वप्येवं पञ्चम्यान्तु गुरोरधः लघुद्वयं लिखेत्पूर्वं शिष्टन्तूपरिवद्भवेत् एवं सर्वत्र विज्ञेयः कलाप्रस्तार उत्तमः तेन द्विगुरुपादस्य पञ्चभेदा
भवन्त्यमी सर्वान्तमध्यादिगुरवश्चतुर्लघुगणाः स्मृताः मूलकृतापि प्रथमेऽध्याये उक्ताः एषां नामान्यपि प्राकृतपैङ्गल उक्तानि।
गुरुजुअं अण्णकण्णो गुरुअन्तकरअल्लापयोहरं मिगुरुमज्झणो अइगकवसुचरणाविप्पो सव्वहि लहुएहि ॥ त्रिगुरुपादादावपि त्रयो
दशादिभेदा भवन्तीति नेस्वयमूह्याः। इति प्रस्तारः ३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

अथ क्रमप्राप्तः प्रस्तारो द्वितीयादिवृत्तस्य स्वरूपज्ञानार्थं नष्टमाह नष्टस्येति नष्टस्य वृत्तस्य योऽङ्कस्तस्मिन् समे सति लघुर्लेख्यः
तस्य नष्टवृत्तस्याङ्कस्याऽर्द्धे कृते सति योऽर्द्धाङ्कस्तस्मिंश्च समे सति लघुर्लेख्यः नष्टस्याङ्के विषमे सति गुरुर्लेख्यः तदुक्तं विषममऽ
ङ्कमेकाऽङ्केन संयोज्य योऽङ्को जातस्तस्यार्द्धे कृते सति तस्मिंश्च विषमे सति गुरुर्लेख्यः समे तु लघुरिति वृत्ताक्षरसंख्यापूर्णं यावत्पुनः पु
नः कुर्यादित्यर्थः विषमाङ्कस्याऽर्द्धीकरणाऽशक्तेरधिकैकेन संयोजनं कृतम् अत्रोदाहरणम् अक्षरप्रस्तारे द्वितीयो वृत्तभेदः कीदृगि
ति प्रश्ने द्वितीयस्य समाङ्कत्वादाऽऽद्यो लघुर्न्यस्य ततो द्विसंख्याया अर्द्धमेकसंख्या तस्या विषमत्वाद्गुरुं न्यस्य ततस्तस्या एकरूपविष

॥ नष्टस्य यो भवेदङ्कस्तस्याऽर्द्धेऽर्द्धे समे चलः ॥

मसंख्याया अधिकेनैकेन संयोजने जातोऽङ्को द्वितीयस्तस्याऽर्द्धमेकसंख्या तस्या अपि विषमत्वाद्गुरुमेव न्यसेदित्यादि लघुर्यग
णो द्वितीयभेदो यथा ।ऽऽ तथा तृतीयो भेदः किंस्वरूप इति प्रश्ने तृतीयस्य विषमत्वाद्गुरुं न्यस्य ततः सैकस्य तस्याऽर्द्धं द्वयं तस्य समत्वाल्ल २१
घुं न्यस्य ततस्तस्याऽर्द्धस्यैकरूपत्वेन विषमत्वाद्गुरुं न्यसेदिति मध्यलघू रगणस्तृतीयो भेदः ऽ।ऽ इति एवं सर्वप्रस्तारश्शोधनीयः । व
र्णनष्टेषु सर्वत्रैवं नष्टक्रमम् अथ मात्रानष्टम् यथा चतुष्कलाप्रस्तारे द्वितीयः कीदृग्भेद इति प्रश्ने चतस्रः कलाः पृथक् स्थाप्या ।
स्तासु प्रथमगायामेकाऽङ्को देयो द्वितीयायां द्व्यङ्कः । एकाङ्कद्व्यङ्कावेकीकृत्य जातस्त्र्यङ्कस्तृतीयायां ॥ ॥ ॥ ॥ ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सांङ्कस्यैकावेकीकृतत्वे जातः पञ्चाङ्कश्चतुर्थ्यो यथा ऽऽऽ। ।।।। पृष्टाऽङ्कमधिकमेकलोपयेत्ऽङ्कलोपयेत् तत्राऽवशिष्टेपूर्वेपूर्वोऽङ्कस्य यथा
संभवेल्लोपयेत्। यस्याऽङ्कस्यलोपस्तेऽधस्तनमात्रा ।।।। परयामीत्रयासहितगुरुर्मायातिप्रष्टतद्द्वितीयभेदप्रश्नेऽन्तिमपंक्तौमेऽ
ङ्कपृष्टाङ्कविलोप्य ऽवशिष्टेऽङ्के पूर्वस्यैकं विलोपयेत् एवञ्चतृतीयचतुर्थैकलोपस्याङ्कयोर्लुप्तत्वात्तदधस्तन्मात्रयोर्गुरुत्वम्भ
वेतीत्यऽन्त्यगुरुद्वितीयो भेदो यथा ।ऽ अत्रसंदायः संग्रहः ॥ संस्थाप्येह पृथक्मात्रास्तत्रचाऽङ्कान्समालिखेत् एकद्व्यङ्कतृतीयाङ्क
नाऽऽद्यमात्रात्रयेक्रमात् ततः पूर्वाद्वयोर्मिश्रात्सन्ऽन्तपृष्टाङ्कलोपनम् पूर्वपूर्वेत्तरस्यापिलोपः सम्भवतो भवेत् यस्ययस्यभवेल्लोपे
तदधोगुरुता भवेत् परयामात्रयेत्यन्तन्मात्रानष्टम्वदेत्सुधीरितिनष्टम् अथनिर्णीतस्वरूपस्यवृत्तस्यस्थानविशेषज्ञानार्थमुद्दि

विषमेचैकमाऽऽधायतद्द्वंद्वंगुरुर्भवेत् ॥ उद्दिष्टन्द्विगुणानाद्यादुपर्य्यङ्कान्समालिखेत् ॥ लघुस्थायेतुत
त्राङ्कास्तैस्सैकैर्मिश्रितैर्भवेत् ५ ॥ एमाह ॥ उद्दिष्टमिति। आद्यमक्षरमारभ्योपरि एकादीनङ्कान्द्विगुणान्लिखेत् तत्रलघुप
रिस्थिता येऽङ्कास्ते संयोज्याऽधिकेनैकाङ्केन सहिताश्चकार्य्याः एवं सति योऽङ्कोजातस्तत्संख्याकमुद्दिष्टं भवेदित्यर्थः उदाहरणन्तु अस्य
प्रस्तारे मध्यगुरुर्जगणः कस्मिन्स्थानेऽस्तीति प्रश्नेन्यासः १२४ ।ऽ। अत्राद्यन्तलघोरुपरिस्थावेकचतुरङ्कौ संयोजितौ तत्पञ्चभवन्ति
तेचैकाङ्केनमिश्रिताः षड्भवन्तीति तत्संख्याके षष्ठस्थानेजगणोऽस्ति यत्र एक एवलघुर्यथायगणः सकस्मिन्स्थानेऽस्तीति प्र
श्नेन्यासः १२४ अत्रलघुपरिस्थमेकमङ्कमेकेनसंयोजितम् द्वयम्भवतीति तत्संख्याकेद्वितीयस्थानेयगणइति अत्रान्त्यलघोरभा
वा ।ऽ तदुपरिस्थाङ्कसंयोजनाऽभावः एवं सर्वत्रज्ञेयम् अथमात्रोद्दिष्टम् चतुष्कलाप्रस्तारेऽत्राद्यगुरुः कस्मिन्स्थानेऽस्तीति प्रश्नेन्यासः १२३५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

२.१.
टी.
२२

चतुर्थमादिगु [ऽ।] रुस्थानमकटम्भवति एवं सर्वत्र ज्ञेयम् अत्र मदीयसंग्रहः उद्दिष्टेनष्टवन्नस्यान्मात्राणां स्या [illegible] उद्दिष्टवृत्तप्रस्तारं लि
खितो परिविन्यसेत् कलयोराद्ययोरेकद्व्यङ्कावन्यकलासु तु पूर्वपूर्वद्वयोर्मिश्रानङ्कान् गुरुरूपस्थैकम्प्रथममात्रायां परस्यास्त्वधो गुरोः
अंसं कराद्यमकानामेकीकृत्य गुरुद्वयेगात् अङ्कानः पतये दन्त्यशिष्टन्नृद्दिष्टमुच्यते इत्युद्दिष्टम्॥ [illegible] प्रमोरेस सर्वगुर्वादिभेदानां संख्या ज्ञा
नार्थं गुरुलघुक्रियारूपं चतुर्थम्प्रत्ययमाह वर्णानित्यादि पद्यद्वयेन छन्दसंख्याकान् वर्णान् एकांकान् [illegible] कनाधिके सहितान् अोत्तराध
र्य्यतः उत्तराधरभावेन स्थितान्कुर्य्यात्तनु नष्टोद्दिष्टवत् तान् [illegible] क्रमेणेति भावः एतान्पूर्वोक्तानेकानेकद्वित्र्यादिक्रमेणोपर्युपर्य्यङ्के क्षिपेत्
प्रथममेकन्द्वितीयेकाङ्केन सह मेलयित्वा द्वितीयस्थाने द्व्यङ्कं कुर्यात् तृतीयेकाङ्केन मेलयित्वा तृतीयस्थाने त्र्यङ्कं कुर्यादित्येवमुत्तरोत्तरं कर्त

वर्णान्वृत्तभवान्सैकानौत्तराधर्य्यतः स्थितान् एकादिक्रमतश्चैतानुपर्युपरि विन्यसेत् ६ उपान्त्यतो निवर्त्तेत त्यज
न्नैकैकमूर्ध्वतः उपर्याद्याद्गुरोरेवमेकद्व्यादिलगक्रिया ७॥ अं उपान्त्यत इति उपान्त्यमन्त्यसमीपमन्त्येकाङ्केन मेलयेदित्यर्थः

मेलनस्य प्रथमावृत्तौ सर्वोपरितनस्थानं त्यक्त्वा द्वितीयावृत्तौ तदधोभूतस्येत्येवं क्रमेण द्रष्टव्यं उपर्याद्याद् इति इत्यत्र ते आद्यात् गुरोः सर्वगुरोः रतन्तरमेक
द्वित्र्यादि गुरुलघूनां क्रिया ज्ञेयेति अयमाशयः ऊर्ध्वाङ्के सर्वगुरोः संख्या द्वितीयाङ्के एकगुरोस्तृतीयाङ्के द्विगुरोश्चतुर्थाङ्के सर्वलघोरित्यादि अथवा
तिभवर्णाकमुद्दिष्टद्विगणाकुरु [illegible] कारान्तरं यथा अक्षरैः सैकानां कानान्त्र्याणामेकांकानान्यासः अत्राधस्तनमेकाङ्कं द्वितीयेकाङ्केन मेलनेन
द्व्यंकं कुर्यात्तस्य द्व्यंकस्य तृतीये कांके मेलनात् त्र्यंकं चतुर्थे कांके उपान्त्यतो मेलनस्य निवर्तितत्वात् इति मेलनस्य प्रथमावृत्तौ तो यमं
कन्यासः [१ ३ ३] अत्र पुनरधस्तनेकांकस्योपरितन द्व्यंके मेलनात् त्र्यंकं कुर्यात् तत्रापुनस्त्र्यंकस्योपरितनत्र्यंके मेलयेत् द्वितीयावृत्तौ सर्वत्र्यंकस्यैवो
पान्त्यत्वा न्मेलनाभावात्तेनायमंकन्यासः [१ ३ ३ १] फलितः अत्रैकः सर्वगुरुस्त्रय एकगुरवस्त्रयो द्विगुरवरेकः सर्वलघुरित्युपरितनांकक्रमेणाभ्यसंख्या

[illegible] २२

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कलादिभेदज्ञानार्थम् मात्रामेरुप्रस्तारोऽन्यत्रोक्तापि ग्रन्थविस्तरभयादस्माभिर्नलिखितः अथप्रस्तारसंख्यारूपमष्टंचमप्यमा
हगलक्रियेति यस्मिन्प्रस्तारेगुरुलघुक्रियायांयेङ्कास्सिद्धास्तेषांसमूहे संयोजितेसतियोङ्कः सासंख्यातत्प्रस्तारस्यभवेदित्यर्थः
यथात्र्यक्षरेगलक्रियायांसिद्धाङ्काएषांसंयोजनात्प्रस्तारस्याष्टौभेदाः अथप्रकारान्तरेणसंख्यामाह उद्दिष्टाङ्केति उद्दिष्टेयेङ्का
स्तेषांसमुदायएकेनसहितस्सन् वाङ्मांसंख्यामुत्पादयेदित्यर्थः यथात्र्यक्षरेउद्दिष्टाङ्काएवं संयोजनात्सप्तसंख्याभवतिसा
चैकेनसहिताष्टरूपाभवतीतितत्संख्याङ्कइतिसंख्याअथवान्तिमवर्णाङ्कमुद्दिष्टद्विगुणंकुरुइतिप्रकारान्तरम् अथाध्वयोगमा
हसंख्यैवेतियस्मिन्यस्मिन्प्रस्तारेयायावृत्तसंख्यासाद्विगुणायस्यादेकेनन्यूनाकृतासतीसद्भिरध्वाप्रस्तारेलेखनाधिकरणदेशः कथितइ

गलक्रियांकसन्दोहेभवेत्संख्याविमिश्रिते उद्दिष्टांकसमाहारःसैकोवाजनयेदिमाम् ८ संख्यैवद्विगुणैकोना
सद्भिरध्वाप्रकीर्तितः वृत्तस्याङ्गुलकीव्याप्तिमधःकुर्यात्तथांगुलिम् ९ ॥ त्यर्थः यथात्र्यक्षरेऽष्टरूपाप्रस्तारसंख्याद्विगु

णीकृताषोडशाभवन्तितेचैकेनोनिताःपंचदशभवन्तीति पंचदशाङ्गुलीप्रस्तारप्रस्ताराधारः अत्रोपपत्तिर्वक्तुंगुरुलघुर्णाप्रमाणमाह।
वृत्तस्येति वृत्तप्रस्तारस्यविस्तारतोव्याप्तिरङ्गुलिकी अङ्गुलीप्रमाणमस्याः साऽपमर्षः अंगुलीवि[illegible]गुरुलघुर्वालेख्याः अधोऽन्त
रालदेशोप्यंगुलविस्तारन्देशन्यक्षान्वृत्तप्रस्तारभेदाल्लेख्यास्तथाच त्र्यक्षरादौपंचदशांगुलोऽध्वास्यष्टाभवतीति अत्रन्यूनाधिक
स्यप्रमाणसम्भवेप्यनुगतस्यशास्त्रार्थत्वादङ्गुलिप्रमाणमुक्तम् अन्तरालदेशेऽङ्गुलित्यागस्तूद्दिष्टानुसारात[illegible]गुरुलघूनाय
त्प्रमाणमुक्तमन्तत्प्रमाणोकान्तरालदेशत्यागइतीहविवक्षितस्तेनप्रस्ताराधिकरणदेशप्रमाण[illegible]ततत्प्रमाणगतेवे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वंशेभूदिनिवःस्यपमुनेः कुलेपद्मेकनामाब्राह्मणोऽभूत्तत ॰॰णोकेदशेशेऽस्मविरचितमितिसम्बन्धः प्रशाद्योपन्यानारेभ्योऽति श
यद्योतनार्थः सचाऽतिशयोलस्यलस्पणेविशिष्टस्वरूपः पद्मेकंस्तौतिप्रकटेत्यादिविशेषणैः शैवसिद्धान्तवेत्ताशिवोदेवताऽस्यशैवः
सचासौसिद्धान्तश्चेतिकर्मधारयः अधिकरणाभ्युपगतार्थः सिद्धान्तस्तथाच प्रथमाध्यायेन्याय॰॰ सर्वतन्त्राधिकरणाभ्युपगमसंस्थि
तः सिद्धान्तइति यत्तुऽत्रषष्ठीतत्पुरुषः शिवपूजकानांसिद्धान्तइतिविग्रहादितिप्रांचस्तच्चिन्त्यम् निषादस्थपत्यधिकरणविरो
धात् ततश्शैवसिद्धान्तस्यवेत्तेतिशेषषष्ठ्यासमासः एतेनभीष्मः कुरूणाम्भयशोकहर्तेत्याद्युपपन्नम् एवंचेहद्वितीयाश्रि
तेत्यत्रद्वितीयेतियोगविभागात्समासः सुपपादइतिदुर्घटवृत्तिर्नातीवादृतव्यायतृजनिकतुरितिनिर्देशात्तृजकाभ्याकर्तरीत्यस्य

वंशेभूत्काश्यपस्यप्रकटगुणगणःशैवसिद्धान्तवेत्ताविप्रः पद्मेकनामाविमलतरमतिर्वेदशास्त्रार्थवेत्ता ॥

नित्यत्वात्कर्मषष्ठ्या समासः सुपपादइतिप्रांचस्तच्चिन्त्यम् शेषषष्ठ्यासौत्रप्रयोगोपपत्तावुक्तज्ञापनस्योत्थानासम्भवात् त्या
सकारस्तुतृन्नन्तेनसमासइत्यादनलोकेतिषष्ठीनिषेधः तृजकाभ्याङ्कर्तरीत्यत्रतृचःसानुबन्धकस्य ग्रहणेनतस्यानित्यत्वा
ज्ञापनात् एतेनतत्समासइतिप्राचामुक्तिश्चिन्त्याइतिदिक् एवम्वेदशास्त्रार्थवेत्तेत्यपिव्याख्येयम्वेदोमन्त्रब्राह्मणेतथाचस्मृ २२
तिर्मन्त्रब्राह्मणयोर्वेदइतिनामधेयमितिशास्त्राणिन्यायादीनितेषांतात्पर्यार्थस्यवेत्तेत्यर्थः अत्रवृत्त्यनुप्रासश्शब्दालंकारःगुण
गणेतिवर्णसाम्यात् अम्बकेश्वरपुरीकृतवासास्मिन्हाविकुलनीरधिचन्द्रात् पुण्यपूर्वपुरुषोत्तमभट्टाद्दुद्भवस्सुकृतीहरिभट्टः
वेदवाक्यनिचयानवयेनप्रेक्षिते विधिरिवेहबुधौघैर्लोकगीतविमला ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यतकीर्तिः सोपिसज्जनमणिर्जयतिस्म २ तस्मादुद्भूतकीर्तिः कृतसुकृतभरान्मल्लतस्मैकवेनासाधूनामग्रगण्योगदद्दलनवि
धीमानवानांशरण्यः ३ काशीसेव्याधिवासोहृतकठिनमहत्कृच्छ्रषड्गोरक्ष्मः श्रीमानापाजिभट्टः सुरयजनरतः सुद्धीराविराजी
त ४ सेतुस्ततनयेनशैवनगरेसद्वृत्तरत्नाकरेनंतुभास्करशर्मणाविरचितः पारसुधानांगणाम् तेनानम्रसुरेन्द्रमुख्यनिकरव्याली
लमौलिस्खलच्चंचद्रत्नमरीचिरंजितपदोदेवोरविःप्रीयताम् ५ नरोतुमचरीकरंपरिहृत्तरत्नाकरंमहीसुमनसामहम्मननहे

॥केदारस्तस्यसूनुःशिवचरणयुगाराधनैकाग्रचित्तश्छन्दस्तेनाभिरामस्त्रविरचितमिदम्भ ॥
॥वृत्तरत्नाकराख्यम् १० इतिश्रीभट्टकेदारविरचितेवृत्तरत्नाकराख्येषष्ठोऽध्यायः ६ ॥ ॥

तुसेतुजडःहरेरिवमहोदधौकपिनिवद्धसेतौस्फुरत्नपन्नुमहिमायुगेश्वरणयोस्समुज्जृम्भते ६ अस्मिवह्निद्वयभूमितवर्षसद्वस २४
नसमयेमधुसुसे आगतःप्रतिपदीहसमाप्तिसेतुरेववुधसंघसुदेस्तु ७ इतिश्रीमदग्निहोत्रिकुलतिलकायमानश्रीमदापा
जिभट्टसूनुपराभिधानहरिभास्करविरचितेवृत्तरत्नाकरसेतौषष्ठोऽध्यायः ६ समाप्तिमगमत् शुभम् श्रीसम्वत् १९३५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृत्तरत्नाकरसटीक

॥ श्रीकाशीविश्वनाथपुरीमेढुंढिराजगणेशकेपास दाऊअग्निहोत्रीकेसिद्धविनाय
कयंत्रमेवृत्तरत्नाकरटीकासंयुक्तछापागया जिसेलेनाहोयउसेढुंढिराजगणेशके
पास दाऊछापावालेकेदुकानपरमिलैगी श्रीसंवत् १९२५ मि पौषवदि ११समाप्तं॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection